लात्मकस्य देवस्य राशिव्याप्तिमजानता कृतंसमण्डलम्
र्थस्यादाज्ञावज्ञानमानिना तस्मात्सर्वं प्रयत्नेन राशी
नस्ताधिपतीन्क्रमात् अवगम्यानुरूपाणि मण्डलानि
न चान्यधीः उपक्रमेदर्चयितं होतुवा सर्वदेवताम् र
जांसि पंचवर्णानि पंचद्रव्यात्मिकानि च पीत शुक्लारुण
श्यामकृष्णान्येतानि भूतले हारिद्रं स्यात्तथा पीतं तण्डु
लं च सितं भवेत् तथा दोघाय वत्तारं सप्तकुरक्तमुच्यते
कृष्णं स्याद्दग्ध पुलाको श्यामं बिल्वदलादिकम् सितेन
रजसा कार्या सीमारेखा विपश्चिता अंगुलोत्सेधविस्ता

प्रशस्ता सर्वकर्म्मसु पीता स्यात् कर्णिका शुक्लपीतर
क्ताश्च केशराः दलान्यत्र स्यान्तरालेषु पाम चूर्णेन पूर
येत् सितरिक्तासिते वर्णैर्हेमत्रयमुदीरितम् नाना
वर्णविचित्राः स्युश्चित्रा कारास्व वीथयः द्वारशोभोप
शोभाः स्युः श्वेतरक्ता हरिद्रकाः राशिचक्रावशिष्टा
निकोणान्यहित्वया निवे पीठपादानि तानि स्युरसिता
न्यरुणानि वा अथवारुणानि च दलानि तथा दलसंधि
रसितवत् असितावरुणाश्च रजसा विहितान्यपि कथ
येत्यपरे इति श्रीगौतमीये महातन्त्रे सर्वतन्त्रोत्तमोत्तमे
अष्टमोऽध्यायः ८ पंचगव्येन तद्‌गेहं मण्डलं च विशो
धयेत् पलमात्रं तु गयभागं गोमूत्रेनावदिष्यते हृतं च प
लमात्रं स्याद्‌गोमयं तोलकद्वयम् दधि प्रसृतिमात्रं स्या
त् पंचगव्यमिदं स्मृतम् अथवा पंचगव्यानां समानो भा
ग इष्यते मूलमंत्रेण संमंत्र्य कुशाग्रेणैव शोधयेत् ते
न सर्वविशुद्धिः स्यात् सर्वपापनिकृन्तनम् महापात
कान्येव कृत्वा गव्यं पिवेद्यदि नाशयेत् पानमात्रेण र
सूत्तुर्वेद वेदिनः भूतशुद्धिं ततः कुर्य्याद्येन पूर्णफलं
लभेत् ॐ नमः सुदर्शनाय स्वाहा तेनैव देशिकः ता
लत्रयं समाविदध्याद्ध्वर्डीहं च समाहितः दिग्बन्धनं छो
टिकाभिर्दशभिः कारयेत् सुधीः ततस्तेनैव जनितं ते
जोरत्नं विचिन्तयेत् विनिधाय करौ स्वांके उत्तानौ परिचि
न्तयेत् हूंकारेण समुत्थाप्य शक्तिं स्वाधारसंस्थिताम मू

लाधारमथ स्वाधिष्ठानं च मणिपूरकम् अनाहतं विशु
द्धं च आज्ञा चक्रं च चिंतयेत् गुदे च ध्वजमूले च नाभौ हृद
ये च कंठे तथा भ्रुवोर्मध्ये यथाक्रमम् अनुस्मरेत् चिं
तयेत् पुनराधारे कनकाब्जं चतुर्दलम् तन्मध्ये चिंतये
द्योनिं चंद्रार्काग्निसमद्युतिम् तदंतश्चिंतयेन्मंत्री जी
वात्मानं समाहितः जवाबंधूकसदृशं तडित्कोटिप्रती
काशं चंद्रकोटिसुशीतलम् प्रदीपकलिकाकारं कुण्ड
लिन्या सहितं तथा सुषुम्नावर्त्मना सोऽहमिति मंत्रेण योज
येत् सहस्रारे शिवस्थाने परमात्मनि देशिकः तथैव पं
चभूतानि संहारक्रमतस्तथा वाक्पादपाणिपायूप
स्थवचनादानमेव च गतिर्विसर्गानंदश्रोत्रत्वक्चक्षू
रसनाः पुनः नासा घ्राणस्तथा स्पर्शो रूपं रसोऽपि गन्ध
कः तत्त्वान्येतानि पंचविंशत् पुरुषेण च योजयेत् अहं
कारं मनो बुद्धिं चित्तं तत्रैव योजयेत् जीवभावेन लीना
नि सर्वाणि परिचिंतयेत् धूम्रवर्णं ततो वायुबीजं षट्
बिंदुलांछितम् पूरयेदीडया वायुं सुधीः षोडशमात्रया
मात्रया च चतुःषष्ठ्या कुम्भयेत् सुषुम्नया द्वात्रिंशन्मात्र
या मंत्री रेचयेत् पिंगलाध्वना पूरयेदनया चैव संचिंत्य
नीलमाकृतिम् रक्तवर्णं वह्निबीजं त्रिकोणं स्वस्तिकान्वि
तम् तेन पूरकयोगेन मात्रया षोडशाख्यया चतुःष
ष्टिमात्रया च निर्दहेत् कुम्भकेन च वामपार्श्वस्थितं पा
पपुरुषं कज्जलप्रभम् ब्रह्महत्याशिरस्कं च स्वर्णस्तेय

यभुजद्वयम् सुरापानहृदायुक्तं गुरुतल्पकटिद्वयम्
तत्संसर्गिपदद्वन्द्वमंगप्रत्यंगपातकं उपपातकरोमा
णं रक्तश्मश्रुविलोचनम् खड्गचर्मधरंक्रुद्धंकुक्षौकृत्वावि
चिन्तयेत् मूलाधारोत्थितेनैव वह्निनानिर्दहेच्च तम् एवं
संदह्य परितो द्वात्रिंशन्मात्रया ततः भस्मना सहितं मंत्री
रेचयेत् पिंगलाध्वना वामनाड्या चन्द्रबीजं कृत्वेन्दुघृतस
प्रभम् भालेन्दुबीजं संयोज्य ततः षोडशमात्रया सुधुत्रया
चतुःषष्टिमात्रया बीजमेलवम् प्लाव्यास्ततमथो हृष्टिपृथ्वी
शाद्वर्णकृपिणीम् तया देहं विचिंत्यैवं मनसापि कुला
ध्वना द्वात्रिंशन्मात्रया मंत्री लबीजेन दृढं नयेत् स्वस्थाने
हंसमंत्रेण पुनस्तेनैव वर्त्मना जीवं तत्त्वानि चानीय स्व
स्थाने स्थापयेत् ततः इति कृत्वा भूतशुद्धिं मातृकान्यासमा
चरेत् गौतम उवाच भूतशुद्ध्या वद ब्रह्मन् कस्य शुद्धिः प्र
जायते नात्मनः सर्वशुद्धीनां कारणमतत्कथ्यते नजी
वस्य ब्रह्मणा च संहैक्यं तस्य नित्यशः न देहस्य तदारम्भ
नित्यता तस्य कथ्यते मनसा वापि शुद्धेश्च कस्य स्यात्कु
र्वीतणम् इत्यादिसंशयं छिन्धि त्वं हि ब्रह्मसमः स्मृतः
नारद उवाच शरीराकारभूतानां भूतानां यद्विशोधनम्
अव्ययब्रह्मसंयोगाद् भूतशुद्धिरियं मता अंतःकरणम
योनुसंतिरात्माप्रवर्त्तते लिंगदेहन्तु तत्प्राहुर्योगिनस्त
त्ववेदिनः तस्य शोधनमात्रेण सर्वशुद्धिः प्रजायते न दे
व विघ्नजनककारणं जन्मकारणम् तद्वियोगे भवेन्मु

गौ· स्वर्नास्यथाजन्मकोटिभिः इत्येतत्कथितं सर्वं गुरुपार्श्वस्थ
तं· निगमे योगाद्यभ्यासयोगेन मंत्राभ्यासेन नाशयेत् भूतशु
२२ द्धिं विधायेसं योगपत्त्देशिकोत्तमः न्यासं देहस्य सत्रांह वि
23 दधीतानुपूर्वकम् भूतशुद्धिर्मातृकाचक्रेशावायातथाच
सा तत्वन्यासं तथा कुर्यात् प्राणायामस्ततः परम् न जीव
स्य ब्रह्मणा च संस्त्रैकं तस्य नित्यशः न देहस्य तदारभ्य निम
ना तस्य कथ्यते मनसो वापि बुद्धेश्च कस्य स्यात्तत्कुरुवीत
एम् इत्यादिसंशयच्छित्यै तं हि ब्रह्मसमः स्मृतः नारद उ
वाच वर्णन्यासं तथा कृत्वा दशतत्त्वं तथा चरेत् विल्वपंजर
नामानं मित्रकः क्रमसंग्रहः तथार्घ्यस्थापनं कुर्याद्य
थावदनुपूर्वशः खवामाग्रे च तत्र संमंडलं परिचिंतयेत्
पुष्पैरभ्यर्च्य तं मंत्री तत्राधारं प्रतिष्ठयेत् मं वह्निमंडला
यनमो मंत्रोऽयं तस्य वेष्ठ्यते हृत्ताकारेण तत्रैव वह्नेर्दशक
लायजेत् हृत्ताकारेण तत्रैव कला द्वादश पूजयेत् कंभ
तापिनी इस्मुकाख्ये वेतापिनीका तथा गं फं उं ब्राय्यधारिण्ये
पूर्ण्वा च परिपूजयेत् यं पं मरीचिमभ्यर्च्य डं नैं ज्वलिनिका
तथा चं थं रुचि बिंदं चैव सुषुम्णा पूजयेद्गुरुः जं थं च भो
गदां मंत्री पूजयेत्कुसुमाक्षतैः फं तं विश्वामभ्यर्च्य त्र
ण च वोधिनी न्यसेत् टंटं च धारिणीं तद्वत् ठं डं क्षमां च पू
जयेत् नमोऽन्ते नैव मंत्रेण च तथा प्रत्ययान्विना पवं शाखे
समभ्यर्च्य कलासौरेर्थनपदाः विलोममातृकां तत्र त्वाखे
ष्ट मंत्रं तथा सुधीः पाथसा तीर्थजेनैव पूरयेद्विमलेन च

ॐकारेणैव मंत्रेण वह्निं तत्र प्रपूजयेत् अमृता मानद
पूषा तुष्टिः पुष्टी रतिर्धृतिः शशिनी चन्द्रिका कान्ति
र्ज्योत्स्ना श्रीः प्रीतिरङ्गदा पूर्णा पूर्णामृता चेति षो
डशकला मदोः बीजं श्रावरथीमेन नमोऽन्तेन प्रपूजयेत्
तत्रासनानि पुष्पाणि सदूर्वाणि विनिक्षिपेत् वामे
नाङ्कायहस्तेन षडङ्गं दक्षहस्ततः दशाक्षरं जपेन्मू
लं मालिनीं शिखयाभ्यसेत् करौ प्रसार्य वामोऽसंस
पुटक्रमयोगतः प्रयोज्य दक्षिणांगुष्ठं तथा वामकनि
ष्ठया वामया दक्षिणाङ्गुष्ठं मुद्रेयं मालिनीमता अर्च
सफलदा प्रोक्ता शङ्खे सा परिचालिता गन्धादिभिः
समभ्यर्च्य कलशं त्रिधा मयोजयेत् अस्त्रादिभिः सुसं
रक्षयेत्तं योगी प्रदर्शयेत् तद्दक्षिणे तु शङ्खं वा ताम्रं
वा पार्थिवं तथा पात्रमेकं निधायाद्यं तथा तोयेन पूरयेत्
ताम्रपात्रं च विप्रर्षि विशेषात् प्रियमतम् तथैव सर्वपात्रा
णां सुविशेषं विप्रकीर्तितम् मन्त्रपात्रं च तथा प्रोक्तं स्वर्णं
वा राजतं तथा पंचपात्रे हरेः सुडुनाम तत्र नियोजयेत्
तेनाम्नेन सर्वत्र रक्षणं मत्र मध्ये भवेत् ततो धर्मादिभि
र्मन्त्री गात्रपीठानि विन्यसेत् गन्धाक्षतैः कुसुमैः पवि
त्रैर्ज्वलयोनितैः इति पीठं समभ्यर्च्य ध्यायेन्मन्त्रात्म देव
ताम् मूलादिब्रह्मरन्ध्रान्ते विषतन्तुस्वरूपिणीम् कुण्ड
लीं त्रिविधां तत्र तथा बीजाक्षरं त्रिधा तरीयां कुण्डलीमू
र्ध्वेण वामदेवं तुरीयकम् ओंकारं मूलदेशे च दद्यात्तत्र स

गौ॰
तं॰
२४

24

र्णनिभं स्मरेत् मूलादिहृदयं यावत् वह्निकुण्डलिनी
तथा हृदये कामवीजे च सूर्य्यायुतसमप्रभम् सूर्य्यकु
ण्डलिनी तत्र सूर्य्यकोटिसमप्रभाम् हृदयाकुलपर्य्य
न्तं ध्यायेदनाकुलः सुधीः भ्रुमध्यान्तु स्मरन्ध्रान्तं मायामि
न्दुयुतप्रभाम् चन्द्रकुण्डलिनी तद्वत् स्ववेदमस्तविग्र-
हाम् विन्दुनादमयं वासुदेवं विन्दोस्तुरीयकम् देशका
लाद्यवच्छिन्नं सर्वतेजोमयं स्मरेत् तुर्य्यकुण्डलिनीत
द्वत्केवलज्ञानविग्रहाम् एवं ध्यात्वा पुनर्वीजं संपूर्ण
मनसा स्मरेत् चिदानन्दमयं स्वच्छं प्रकाशैकतया गुरुः
स्वयाहृष्ट्या निपतेत्स्यात् तर्पयेत् परदेवताम् ध्यात्वा ध्यात्वा
पुनर्ध्यात्वा सहजानन्दविग्रहः चिदम्बुतस्तथाभिस्तत्त
र्पयेच्च पुनः पुनः अन्तर्यागमिति प्रोक्तो जीवतो मुक्तिदा
यकः मुनीनां च मुमुक्षूणामधिकारोऽत्र केवलम् अथ
वामानसे ईंशैः प्रकटेनापि पूजयेत् ध्यात्वा हृत्पद्मम
ध्येतं वासुदेवं यथोदितम् स्वागतार्घ्येण पचरेत्पाद्या
द्यैः स्नानभूषणैः गंधपुष्पधूपदीपैर्नैवेद्यविधिना-
विना पुष्पाञ्जलीन् ततो दद्यात् ब्रह्मालान्निवेदयेत् अ
थवाहृतसंभूतैः प्रकृष्टैर्द्वेयत्प्रभुम् स्वागतार्घ्यैर्निवे
द्यान्तैरात्मभेदेन पूजयेत् चन्दनागुरुनिष्पन्दवर्त्तितांगः
स्वयं गुरुः विस्रपञ्जरमन्त्रेण तज्जत्स्थाने विधानवित्
रचयेत्तिलकं भक्त्या प्रदीपकलिकानिभम् पुष्पाञ्जलिं प
च कृत्वा विधिवत्तत्तयाद्गुरुः तुलसीयुगलं वामपादे

दक्षिणकेतथाहस्याद्रिपुगलेपार्श्वद्वयेगन्धाद्यान्वितं
पद्मयुग्मंमूर्द्धिणदेशेमूलेनदत्तवामके षड्भिःसर्वत
नौम्यसेत्पुनःसर्वैस्तुसर्वतः एवंपुष्पाञ्जलिप्रोक्तोहरि
सान्निध्यकारकः श्रीवत्सेदक्षिणेदद्यात्सितपुष्पेणसं
युतम् वामेचचन्दनेदद्यात्तथारक्तेनसंयुतम् सर्वपुष्पा
ञ्जलीदद्यात्सर्वगन्धसमन्वितः दक्षिणेवामदेवाख्ये
स्वचैतन्यसमव्ययम् वामेचरुक्मिणीनित्यारक्तारजोगु
णान्विता तेनसत्वरजोरूपंआत्मानंचिंतयेद्गुरुः मूल
मंत्रंजपनवुद्ध्या सुषुम्नामूलदेशके मंत्राणेंतस्यचैव
स्वबीजंध्यात्वापुनःपुनः उदयादिलयांतेचमंत्रमेवस
मभ्यसेत् उदयःशाहूरूपश्चलयश्चात्माप्रकीर्तितः ज्ञा
नाज्ञानविभागेनतन्मयोभवयेत्तम मनःसहस्रसंशो
धनोमं मंत्रार्थचिंतनम् अथध्यानमनिर्वेदोजपस
म्पत्तिहेतवः एवंतेकथितंसम्यक्त्रिविधंयजनक्र
मम् यावत्कृत्वासम्प्रदायेनमंत्रीवांछितमश्नुते॥
अथमण्डलमध्येतुपूजनेवाद्यगोचरम् आरभेत्प्र
कोष्ठैईशेनानारसस्तुविस्तरैः पाद्यार्घ्याचमनीयानि
पात्राणिचस्वदक्षिणे संस्थाप्यतत्रद्रव्यैस्तुपूरितानिच
देशिकः अर्घ्यास्यत्रीणिपात्राणिपाद्यस्यापित्रयंभवेत्
तथाचाचमनीयानिपात्राणिचविभागशः तथाकरणे
दौर्वल्यादेकमेकंप्रशस्यते एवंयेहिविधिनामंत्रीमण्ड
लमुभतेउलेः स्पडैरेवान्विकैःसम्यगयावत्पंकजं

डलम् कुशान् विस्तार्य्य तत्रैव पंकजं विष्टरान्वितं पुष्पा
णि च विकीर्य्याथ कुम्भस्थापनमाचरेत् हैमं रूप्यं ताम्रम
यं मार्त्तिकं वा स्वशक्तितः वित्तशाठ्यं न कुर्वीत कृतेः नि
ष्फलमवाप्नुयात् द्वात्रिंशदंगुलं कुम्भं विस्तारेणत्रतिशालि
ने षोडशद्वादशांगुलमेतान्मूनं न कारयेत् पुण्यस्त्रीनि
र्म्मितैः सूत्रैर्विधिवत् त्रिगुणीकृतैः तेनसंवेष्टपरितः य
थान्तरं न कचित् मध्ये रन्ध्रः साधकस्तरणेवापदो
पदे तस्माद्दोषापि विज्ञाय कुर्य्यात् सर्वमतन्द्रितः प्रक्षा
ल्यानर मंत्रेण गंधैः परिमलान्वितं वेदविद्भिर्द्विजैः सार्द्धं
स्थापयेत्तारमुच्चरन् समीहृत्तत्व चांतोयैरथवा पल्लवौ
षधीः विस्वगन्धाष्टकं वापि तीर्थादेर्वापि पूरयेत् चंद
नागुरुकस्तूरी वेरकुष्ठ कुंकुमरोचनाः जटामांसी मुरामां
सी विस्वागन्धाष्टकं स्मृतं गन्धाष्टकमिदं स्वंच विस्नोः
सान्निध्यकारकं वह्निरूपमथाधारं कलाभिः सह पू
जयेत् तथा सूर्य्यमयं कुम्भं तत् कलाभिः प्रपूजयेत्
जले सोममयं तद्वत् तत्कलाभिः समर्च्चयेत् तेजस्त्र
यमिदं प्रोक्तं जलं तदात्मकं स्मृतं विलोममातृकावर्णैः
सर्वत्र पूरणं स्मृतं तथा मूलं समच्चार्य्य पूरयेद्धि गता
मयः तीर्थमंत्रेण तीर्थानि योजयेत् सूर्य्यमण्डलात् दृ
हृतं शंखं तथा स्थाप्य स्वपुरोभागमग्रतः तत्राधारं प्रति
ष्ठाप्य पूजयेद्वह्निमण्डले ततः शंखं प्रतिष्ठाप्य सूर्य्या
त्मकमथार्चयेत् प्रदक्षिणक्रमेणैव कलाः सर्वत्र पूज

विलोममातृकां जप्त्वा तथा मंत्रं प्रपूरयेत् क्वाथोदके
षोडशैर्थैर्वा पूर्वोक्तैर्वा प्रपूरयेत् तेजस्तयकलाऽभ्यर्
च्य प्राणस्थापनपूर्वकं आवाहनादिकं कृत्वा कलाप
केकशः क्रमात् संपूज्य विधिवद्विद्वान् देवसान्निध्यहे
तवे प्रणवांशोद्भवः सम्यक् कलास्तत्र प्रपूजयेत् स्थाप
नेनैतत्संयोज्य गन्धपुष्पादिभिर्यजेत् एकैकमस्करूप
ठेत्तत्र तत्तत्र जपं तिपेत् पाद्यस्तेजोमायेन त्रायोजये
द्गुरुसत्तमः प्रथमे प्रकृतेर्हंसः प्रतिहिस्वरन्ततरे
अव्यक्तं च तृतीये स्यान्नहि प्रांसावतष्टये विसर्गयोनि
कल्पयेत् पंचमे परिकीर्तितं अकचपंचकमिदं प्रोक्तं
प्रणवार्णस्वरूपकं नारस्यपंचभेदेन पंचाशद्वर्णगाः
कलाः सृष्टिर्ऋद्धिः स्मृतिर्मेधा कांतिर्लक्ष्मीर्द्युतिः स्थि
रा स्थितिस्सिद्धिरिति प्रोक्ताः कचवर्गगताः क्रमात् अ
काराद्धलगोत्पन्नानतचामीकरप्रभाः एताकरथ
नालसकपंकजहृदयकुण्डिकाजराचपोलिनीशांति
रीश्वरीरतिकामिके वरदाह्लादिनीप्रीतिर्दीर्घाःस्यु
स्तवर्गगाः उकाराद्विस्तनीत्पन्नास्तमालदलस
न्निभाः अभीतिदवचकेक्षूवाहवः परिकीर्तिताः ती
क्ष्णा रौद्री भया निशा तंद्री क्षुत्क्रोधनी क्रिया उत्कारी
मृत्युरेतः स्युः कथिताः पयवर्गकाः वज्रेणनार्णोद्भ
तपत्राः शरच्चन्द्रनिभाप्रभाः उद्वहेत्यभयंश्शूलं कपाले
वाहभिर्वरं ईश्वरेणोदिता विष्णोपीतश्वेताऽरुणा सि

ताः अंताश्च यकवर्गस्याज वाक्कुसुमसन्निभाः अभयं
हरिणं टंकं दधाना बाहुभिर्वरं निवृत्तिः संप्रतिष्ठा
स्याद्विद्याशांतिरनंतरं इंधिका दीपिका चैव रेचिका मो
चिका परा सूक्ष्मा सूक्ष्मामृता ज्ञानामृता चाप्यायनी त
था व्यापिनी व्योमरूपाः स्युरनंता स्वरशक्तयः सदाशिवेन
संजाता नादादेताः सितप्रभाः अनंतस्य कपालस्य कुणक
पालवरांजनी नवैताः कलाः समावाह्य कृत्वा प्राणसमं स
यमं संपूज्य गंधपुष्पाद्यैः स्थाने जलमर्पयेत् कुंभे ते
जस्त्रयकलाश्च षष्टिविंशज्जपन् ततः जपेन कलाश्च पंचाश
न्प्राणवाश्च समुद्भवाः पुनश्च पंचवर्णकं जप्त्वा मूलमंत्रं
जपेत्ततः चतुर्नवति मंत्रोऽयं देवसान्निध्यकारकः न
वरत्नं तद्देवानिः लिपि मातृका जपन् नवरत्नमथवा
ध्यान् नवरत्नं तदात्मकं वज्रमौक्तिकपुष्पाख्यं विद्रुमं
पद्मरागकं नीलामकरतं चैव माणिक्यं स्वर्णपवच नव
रत्नमिति प्रोक्तं सर्वदेवाश्रमं महत् स्थापयेत्तस्य वैमं
डीचपकं फलसंयुतं विष्टरं तस्य विदध्यात् दत्वा च पंचप
ल्लवं शुद्धेन सौमसुगेमनतिर्मलेनांशुकेन वा वेष्टयेद्वि
पिनामंत्री सर्वाश्चर्यं यथा भवेत् वहमालां ततो दद्या
त्गंधवस्त्रमनोहरं हरिमावाहयेत्तत्र छायायां कल्पशा
खिनः इति श्रीगौतमीयमहामंत्रे नवमोऽध्यायः अथ ब
ध्वांजलिकरः समायतनभस्थलः हृत्पद्मसंस्थितं तेजः
कुंडल्या सह मेलयेत् चिदानंदमयं शुद्धं सर्वतेजोमयं स्मरेत्

षट्चक्रभेदनेनैव उन्मन्या सह योजयेत् जीवान
त्मयं तत्प्राप्य नैश्वर्य्यमद्भुतं आराध्यमाने सैद्वे
देहन्नासापुटक्रमात् करस्थमातृकाम्भोजे चैतसे
योजयेद्बुनान् कुम्भमध्ये मंत्रमुर्त्तावावाह्य परिपूजये
त् हंसः हंसः महायोगिन् सर्वसत्वहृदिस्थित सर्वत्र
सर्वगब्रह्मन् कृपया सन्निधीभव मंत्रेणानेन संस्था
पनं तन्मुद्रां प्रदर्शयेत् ऊर्द्धांजलिमथः कुर्यादियमा
वाहनी भवेत् सैयं तु विपरीता स्यान्मुद्रा स्थापनक
र्म्मणि वाहांगुष्ठद्वयं मुष्टीन्तु शस्यात् सन्निधापनी श्रे
गुष्ठगर्भिणी सैव मुद्रा स्यात् सन्निरोधनी अधोऽग्रत
र्ज्जनीयामभ्रमणाद्देवगुंठनी आवासंपंचमुद्राभिः प्रा
णस्थापनमाचरेत् पाशांकुशपुटाशक्लिनोऽहंस
मंत्रं वदेत् हंसस्य प्राणा इह प्राणाः हंसस्य जीव इ
ह स्थितः हंसस्य सर्वेन्द्रियाणि वांमनश्चक्षुरित्यथ इ
हागत्य सुखं चिरं तिष्ठन्तु स्वाहया युतं अयं प्राणमन्त्रः
प्रोक्तः सर्वजीवप्रदायकः अनेन तु विहिता येऽर्म्मन्
वा निर्जीविता मताः हंसस्य वस्य गुरुतं त्रतो ज्ञान
वैभवे किं न सिध्यति विप्रर्षे देशिकस्य तु चामथा
मातृकां केशवाद्यां वा तत्वं संन्यस्य येन वै करांगद
शतत्वानि न्यासनात् सन्निधिर्भवेत् सर्वात्मा सर्वगो
देवो मण्डलाधारधिष्ठितः शालग्रामे मणौ यंत्रे म
ण्डले प्रतिमासु च नित्यं पूजा हरेः कार्या न तु केवल

भूतले गण्डक्याश्चैकदेशे च शालग्रामस्थलं महत् पा
षाणं तद्भवं यत्तत् शालग्राममिति स्मृतं शालग्रामशि
लास्पर्शात् कोटिजन्माघनाशनं किं पुनर्यजनं तत्र हरेः
सान्निध्यकारकं शालग्रामैकयजनाच्छतलिंगफलं ल
भेत् बहुभिर्जन्मभिः पुण्यैर्यदि कृष्णशिलां लभेत् गो
ष्पदेन च चिह्नेन तेन समाप्यते जन्तुः कामक्रोधादिदोषा
प्सर्वदुःखविनिपवणात् एवं मिस्माद्धरेतस्मिन् देवः
प्रीणाति पूजितः पद्ममष्टपलाशं च चतुरस्रं सलक्षणं
चतुर्द्वारसमायुक्तं कामगर्वितकर्णिकं सामान्ययत्र
मुद्दिष्टमष्टादशान्तरं भूषणं चतुरस्रं च चतुर्द्वारं पद्ममष्ट
दलान्वितं षट्कोणमध्ये कामाख्यं सप्तदशार्णं वेष्टि
तं षट्तरमनुवरं षट्कोणे विलिखेत्ततः एतद्यन्त्र
महाभाग कृपया कथितं तव अस्य विज्ञानमात्रेण कृ
ष्णात्मा साधको भवेत् आखण्डमण्डलाकारं व्याप्तविश्वं
विजृम्भते सर्वदेवमयं येन तेन मण्डलमुच्यते प्रतिमा
कृष्णदेवस्य यत्नतः कारयेत् सुधीः शिल्पिना कृस्मा
भकेन विश्वकर्म्मा क्रजानतो दशपंचांगुला मुख्या
मध्यमा द्वादशांगुला अष्टांगुलाधमा सा तु स्वनापि
कं न कारयेत् अज्ञानेनापि मोहेन यदि कुर्य्यान्नराधमः
प्रतिष्ठा विफला न स्य पूजनान्न फलं भवेत् मानांगुल
विहीना सा प्रतिमा यत्र तिष्ठति राजानं पीडयत्येव रा
ष्ट्रस्था नरकं व्रजेत् मानांगुलेन सा कार्य्या नान्यथाम

निमत्तम कामरीक्षानदाशोकास्वर्णजापिवमुक्तिदा
सम्यन्निदात्तुशिलजाराजतीवहमुक्तिदा तेजोजादा
रुजायाचैरेक्तिकीशत्रुनाशिनीताम्रीधर्म्मविवृद्धिवक
रोतिवह्लसौख्यदा मृदेवमृण्मयीशोकोप्रतिमा शुभल
क्षणा भोगदामोक्षदासानुप्रतिमाकथितातवलेप्या
मेख्याह्लिथासापिप्रतिमापरिकीर्त्तिता पर्वताग्रेनदी
तीरेवत्वैरगोष्ठभूमिषु समुद्रकूलेग्रामोवामानहीना
त्रहूषणे कृष्णप्रतिकृतिकर्ण्णदिव्यापंशस्वविहृताता
तेसस्थापयेन्मत्रीगृहेवागोष्ठमध्यतः समाहितस्ततो
मंत्रीपूजयेदुपचारकैः षोडशोपचारमंत्रेणायमनाख्ये
नसिद्धये यस्यदर्शनमिच्छंतिदेवाब्रह्महरादयः कृप
यादेवदेवेशमदग्रेसन्निधीभव उच्यतेपरमेशानस्वा
गतंस्वागतंभवेत् कृतार्थोनुगृहीतोस्मिसफलंजी
वितंतवेयदागतोसिदेवेशचिदानन्दमयाव्यय आज्ञा
नाद्वाप्रमादाद्वानैकःस्यात्साधकस्यच यदपूर्णंभवे
त्कृत्यंतथाप्यभिमुखोभव पाद्यंपापाकरंद्वार्कवि
स्वक्रांताभिरिष्यते यद्भक्तिलेससम्पर्कात्परमानंद
संप्लवः तस्मैतेपरमेशानपाद्यंशुद्धायकल्पते नानील
वेगककोलैर्द्दयादाचमनीयकं स्वधामंत्रेणमतिमान्
स्वतावेदतिणकरं वेदानामपिवेदायदेवानांदेवता
त्मने श्रत्वामंकल्पयामीशाशुद्धानांशुद्धिहेतवे गन्ध
पुष्पाक्षतयवकुशाग्रतिलसर्षपान् दुर्वाभिर्देवशिरसि

गो·
२५
48

शिरोमस्तेण चार्पयेत् एतदर्घ्यमिदं प्रोक्तं तुष्टये शार्ङ्ग-
धन्वनः तापत्रयहरं दिव्यं परमानन्दलक्षणं तापत्रय-
विमोक्षाय तवार्घ्यं कल्पयाम्यहं घृतदधिमधुमिश्रं म-
धुपर्कं स्वर्णपात्रे तु ना सर्वकल्मषहीनाय परिपूर्णसुखात्म-
के मधुपर्कमिमं देव कल्पयामि प्रसीद मे मुखे चवमनं
दद्यात्केवलेन जलेन च उच्छिष्टोऽप्यशुचिर्वापि यस्य स्म-
रणमात्रतः शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकं च-
न्दचन्दनकाश्मीरजलैः स्नानं विधीयते परमानन्दबो-
धाब्धिनिमग्ननिजमूर्तये सांगोपांगमिदं स्नानं कल्पया-
म्यहमीशाते पीताम्बरयुगं दद्याद्यथाशक्त्या परिष्कृ-
ते मायाचित्रपटाच्छन्ननिजगुह्योरुतेजसे निरावरण-
विज्ञानवाससे कल्पयाम्यहं उत्तरीयं ततो दद्याद्धासोऽर्द्ध-
नियमान्विते यमाश्रित्य महामाया जगत्सम्मोहनी स-
दा तस्मै ते परमेशाय कल्पयाम्युत्तरीयकं यज्ञसूत्रं त-
तो दद्याद्धवा स्वर्णनिर्मितं यस्य शक्तित्रयेणेदं संप्रो-
तमखिलं जगत् यज्ञसूत्राय तस्मै ते यज्ञसूत्रं प्रकल्पये-
त् हाराद्याभरणं दद्यात्स्वर्णाश्मसमन्विते स्वभावसु-
न्दरांगाय सत्यासत्याश्रयाय ते भूषणानि विचित्राणि क-
ल्पयाम्यमरार्चित अर्घ्यान्ते तज्जलं दद्यादुपचारान्तरान्तरे
समस्तदेवदेवेश सर्वतृप्तिकरं परं अखण्डानन्दसंपू-
र्णं गृहाण जलमुत्तमं चन्दनागुरुकर्पूरमिश्रो गन्धइ-
होच्यते सर्वांगलेपयोग्येन तापत्रयप्रशान्तये परमा

नन्दसौरभ्यपरिपूर्णादिगंतरं गृहाणपरमेशानत्वंकृ
पयापरमेश्वरं पंचपुष्पांजलीन्दद्यात्पूर्वोक्तेनव
वर्त्मना तान्यस्मात्यपिचयोग्यानिपुष्पाणिवक्ष्येमनो
कमलेकरवीरेहेतलसोजातिकेतकीकह्लारचम्प
कोत्पलकुन्दमन्दारनागकेशरपावंती नद्यावर्त्तकं
मल्लिकायुथीनवमालिकासौगन्धिकंचकोरकं को
रण्टलोकमञ्जनविल्वार्जुनमुनिपत्रकं पंचामलकं
शुद्धकर्णिकारंतथाशुभं पलाशादियथालाभंगोविन्द
यसमर्पयेत् मलिनंभूमिसंस्पृष्टंक्रिमिकेशादिदूषि
तं पर्युषितानिपुष्पाणिवर्जयेद्देवतार्च्चनेनिषिद्धदिन
त्रयेशुद्धंपद्ममामलकंतथातुलसीसर्वथाशुद्धात
थाविल्वदलानिच दिनैकंकरवीराणियोग्यानिचत
पोधन तुरीयगुणसम्पन्नंनानागुणमनोहरं आनन्द
सौरभंपुष्पंगृह्यतामिदमुत्तमं मंत्रसंपुटितांमस्मा
लकांदेववर्ष्मणि ततआसनस्थलेतांस्तान्गन्धपुष्पात
तैर्यजेत् पंचालिकायांदीप्तायांगणेशादिकमाद्यजे
त् यस्मध्येतगोविंदनैऋत्यांगणनायकं आग्नेय्यां
हंसमभ्यर्च्यैशान्यांशिवमर्चयेत् वायव्यामर्चयेद्देवी
भोगमोक्षफलाप्तये गन्धादिभिर्यथाभ्यर्च्यसिंहगास
र्च्येनततः शक्तौतत्रदक्षिणसर्वमन्यथाकेवलंयजेत्
विंशत्कृत्वोजपेन्मंत्रेनमस्कृत्यसमापयेत् ततोदेवे
षडंगानिवक्ष्यमाणेनवाजयेत् आग्नेय्यांशिवकोणेच

गो·
तं·
२९

29

वराननमेवाग्नकोणके मध्ये दिक्षु च पूर्वादिष्वङ्गषट्कं
समर्चयेत् हारस्फाटिककाश्मीराञ्जनमुक्तावह्निरोचिषो
ललना अभयवरोद्यतहस्ताः प्रधानतोऽङ्गदेवताः क
ल्पिताः एवमभ्यर्च्य मतिमान् देहेत द्देवतो यजेत् शुच
स्यं वेणुं घेत्रयत् पूजयेत्सुसमाहितः वर्णेवनमस्त
स्य मंत्रोऽयमुदीरितः कौस्तुभं हृदये रत्नं सूर्यायुत
समप्रभं कौस्तुभाय नम इति तस्य मंत्र उदीरितः तद
धो वनमाला च चन्द्रायुतसमप्रभं प्रणवं पूर्वमुच्चार्य
वनमालायै नम इति वदेत् वनमाला मनुः प्रोक्तः सर्वपा
पौघनाशनः कौस्तुभोर्द्धे च श्रीवत्सं चन्द्रायुतसम
प्रभं श्रीवत्साय नम इति मनुस्तस्य महर्षिभिः सह
स्रसूर्यसंकाशे कर्णे मकरकुण्डले मकरकुण्डलाय
नम इत्यस्य मनुरीरितः किरीटं मस्तके दीप्तं सूर्यायु
तसमप्रभं सूर्यायुतसमाभासकिरीटाय नमो वदेत्
प्रणवादिरयं प्रोक्तः किरीटस्य महर्षिभिः पूर्वादिदि
शमारभ्य प्रादक्षिण्यक्रमाद्यजेत् रामसुदामवसुदा
मकिंकिणीगन्धपुष्पकैः अन्तःकरणरूपास्ते कृष्ण
स्य परिकीर्तिताः आत्माभेदेन ते पूज्या यथा कृष्णस्त
थैव ते प्रणवादिनमोऽन्तैश्च मंत्रैस्तान् परिपूजयेत्
नवांगमस्तके देवस्य भोगांगं शृणु गौतम अष्टौ महिष्यो
देवस्य पुरस्तादि प्रपूजयेत् प्रदक्षिणक्रमेणैव रुक्मि
णाद्यास्तु ता मताः रुक्मिणी सत्यभामा च लक्ष्मणा च

सुलक्षणा कालिन्दीरुक्तजा नग्नजित्याख्या च सुनन्दका
द्रुतहेमसमप्रख्या रुक्मिणीरूढयौवना सितवस्त्रप
रीधाना सर्वाभरणभूषिता देवस्य वदनाम्भोजमिलिता
लिमधुव्रता वराभयकरोपेता भक्तायसुकयेसता इय
लक्ष्मीः पराशक्तिर्विश्वानुग्रहरूपिणी कलायकुसुम
श्यामा सर्वाभरणभूषिता पीताम्बरहरुच्छीणी सत्याख्या
धरणिस्सुता रत्नपूरकरा वामे दक्षिणे च वरप्रदा श्रमाश्च
गौराः श्यामाभाः क्रमेण परीकीर्तिताः पीताम्बरपरीधा
ना देवार्पितमनोमुखाः तद्बहिर्वसुदेवं च यशोदां देव
कीं पुनः वसुदेवो हेमगौरो वराभयकरस्थितः देवकी
श्यामसुभाग सर्वाभरणशोभना सितवस्त्रयुगाढ्या
च सर्वेप्सितफलप्रदा यशोदा हेमशंकाशा सितवस्त्र
युगप्रदा सर्वाभरणसन्दीप्ता कुण्डलोड्डासितानना
रोहिणी च यजेत्तत्र नन्दं गौरं समर्च्चयेत् वरदाभयसं
युक्तं समस्तगुरुपार्श्वदे वलदेवं तथा चैव पूजयेत् कु
न्दसन्निभं हालालोलं कुण्डलिनं हेमवं तं स्मरेत्तथा त
तो यजेत् सुभद्रां च श्यामलं रूढयौवनां तद्बहिर्वयस्यः
सर्वगोपं गोपीश्च समर्च्चयेत् इन्द्रनीलमुकुन्दाख्यान् तद्ब
हिः परिपूजयेत् इन्द्रनीलं मुकुन्दं च तथा चानन्दकन्द
पौण्ड्रकं रेशाख्यपद्मौ वनिधायाषौ प्रकीर्तिताः तद्बहिः
कल्पवृक्षांश्च इन्द्रादीन्तद्बहिर्यजेत् इन्द्रमैरावतारूढं
श्यामं वज्रधरं तथा साग्निं पं सपरिवारं च तद्बहिः परिपू

गो॰
ते॰
२॰
30

जयेत् अग्निं हेमसमाभासं शक्तितोमरधारिणं मेषारू
ढं शक्तिशुक्लं तेजसांपतिमर्च्चयेत् दक्षिणे पितृदेवं चम
हिषोपरिसंस्थितं पजेद्दण्डधरं चैव यमं पित्राधिदैवतं
राक्षसाधिपतिं नक्तं नैरृत्यां खड्गधारिणं नरयानस्थि
तं देवपरिवारैः समर्च्चयेत् पाश्चात्ये वरुणं शुक्लं मकरा
रूढमुज्ज्वलं अपांपतिं पाशधरं परिवारैः समर्च्चयेत् वाय
व्यां वायुदेवं च प्राणाधिपसमाह्वयं दत्तहस्तांकुशं मेण
वाहनं परिपूजयेत् शरदिन्दुसमाभासं कुम्भपाशश
लांछनं सोमं सोमदिगाधीशं नरारूढं समर्च्चयेत् ईशा
नं वृषभारूढं चन्द्रामृतसमप्रभं रुद्राधिपं शूलहस्तं
गन्धपुष्पैः प्रपूजयेत् इन्द्रेशानमध्यदेशे ब्रह्माणं हं
सवाहनं हेमगौरं च तं वेदकं पद्महस्तं समर्च्चयेत् रक्षो
वरुणयोर्मध्ये विष्णुं चक्रधरं यजेत् नागाधिपं तप
णीस्थं विष्णोः पारिषदान्यजेत् वज्रादीनायुधान्भ
शान् तेषां च बहिरर्च्चयेत् यथाभिन्नसमुद्भूतातरंग
भिन्नतोयधुः तथा कृष्णसमुद्भूताप नेतत्सायतोयधुः
तज्ज्ञानेन च तन्नैव साधकेन शुभेप्सुना एवं समाहृतिम
पदेशिकः कृष्णमर्च्चयेत् धर्मार्थकाममोक्षाख्यं करे तस्य
स्य निश्चिते अथवागादिकपतिभिस्तद्देवैरपि वार्च्चयेत् ए
वं वार्च्चयेत् कृष्णकामसुखेप्सुः सभाजनं यथतद्यजनो
शकः कृष्णाष्टकेन पूजयेत् श्रीकृष्णो वासुदेवश्च नारायण
समाह्वयः देवकीनन्दनः शौरिर्वार्ष्णेयनन्दनेतरं अस्रा
तकभारहारी धर्मसंस्थापकः स्मृतः अष्टौ वा पूजयन् कृष्णा
यथाविनाशमारतः इहभुक्त्वावरान्भोगानन्ते तद्धरीतां व्रजेत्

अगुरूशीरगुग्गुलसिताज्यमधुचन्दनैः सारङ्गो वैरि-
निर्मितैर्नासाध्योमधुमर्पयेत् वनस्पतिरसोत्पन्नोग
न्धाढ्यो गन्धउत्तमः आघ्रेयः सर्वदेवानां धूपोऽयं प्रति
गृह्यतां वर्त्याकर्पूरगर्भिण्या सर्पिषा तिलजेन वा सं
स्थापयन्नपात्रादौ सुदीप्तशिखया ततः अर्घोदकेन सं
स्कृत्य नन्दजाय निवेदयेत् उत्तार्य्य दक्षिपार्श्वतं घंटां वाम
दिशि स्थितां वादयन् वामहस्तेन दक्षहस्तेन चार्पयेत्
स्वप्रकाशो महातेजाः सर्वत्र तिमिरापहः सबाह्याभ्यन्त
ज्योतिर्दीपोऽयं प्रकाशो महातेजाः सर्वत्र तिमिरापहः
सबाह्याभ्यन्तज्योतिर्दीपोऽयं प्रतिगृह्यतां स्वर्णे वा ताम्र
पात्रे वा रौप्ये वा पंकजे दले स्थितोपदेशशाल्यन्नं सगुडं
मधुनाप्लुतं दधिदुग्धघृतोपेतं कदल्यादिफलान्वितं
आनीय देवपुरतः पंबीजेन विनिक्षिपेत् अस्त्रमंत्रेण
विधिवद्दहेत्तु मुद्रां प्रदर्शयेत् वह्निबीजं चामृतं संस्पृश्य चतु
र्दशस्वरान्वितं नादबिन्दुसमायुक्तं बीजं तदमृतात्मकं
परायेति च संप्रोच्य अनिरुद्धं वदेत् पुनः नैवेद्यं च ततो
मुकाकल्याणि नमो वदेत् श्रीकृष्ण नैवेद्यमेत्रोऽयमग्ने
न च निवेदयेत् अमृतोपस्तरणमसि स्वाहेति जलमर्प
येत् अन्वाहार्याय प्राणाय स्वाहेति प्रथमाहुतिः अंगु
ष्ठानामिकामध्यमाभिर्मुद्रिकामता आहवनीया
य अपानाय स्वाहेति च द्वितीयिका कनिष्ठांगुष्ठनामा च
मुद्रा ततः परिकीर्तिता गार्हपत्याय व्यानाय स्वाहेति हुती

गौ· नं· ३१

31

याहृतिः तर्ज्जन्यंगुष्ठमध्याभिर्लग्नमुद्रापरिकीर्त्तिता
तस्मायचउदानायस्वाहृयाचवतुर्थिका मध्यमानामि
कांगुष्ठवतुर्थीचकनिष्ठिका श्रावसमायसमानायस्वा
हाचपंचमीतथा सर्वाभिरंगुलीभिर्लग्नतमुद्रापरिकी
र्त्तिता प्रणवाद्यैरेभिरेवदेववक्रेहुनेद्गुरुः ॐनिवेद
यामिभवतेगृहाणेदंहरिर्हरे निवेद्यार्पणमंत्रोऽयंस
पर्य्यास्तप्रकीर्त्तितः तर्णेविमृष्टमतिमान्दद्याद्गण्डू
षकंततः अमृतोपस्तरणमसिस्वाहेतिजलमर्पयेत्वि
ष्वकसेनायवेदद्याच्छेषं नैवेद्यमुत्तमं उच्छिष्टभोजिनो
ऽन्येपतेषामवधारय शिवचण्डेश्वरायेतिविष्णोविष्व
कसेनायच शक्त्युच्छिष्टंशेषिकायैदद्याद्वनसिद्धयो
अन्यथानैवसिद्धिःस्याद्रौवकोनरकंव्रजेत् नैवेद्यञ्जात
मुहूर्त्तस्थानशुद्धिंविधायच आचमनीयजलंदद्यादंत
शोधनमेववाहस्तलेपनतोदत्वापुनःपानीयमर्पये
त सूत्रवस्त्रद्वयंदत्वादद्याद्वस्वर्णपादुके पूजास्थानं
समानीयवक्रमालांतथार्पयेत् दिव्यगन्धंततोदद्या
ताम्बूलंशशिसंयुतं स्तोत्रैःस्तुत्वाचविधिवत्कृत्वाप्र
दक्षिणंहरिं वेदविद्योथवेदत्वायत्फलंलभतेनरः
तत्फलंलभतेभक्त्याकृत्वाकृत्स्नप्रदक्षिणं सप्तद्वीपां
धरांदत्वावेदविद्यामहात्मने तत्फलंलभतेभक्त्या
कृत्वाकृत्स्नप्रदक्षिणं पद्भ्यांकराभ्यांजानुभ्यामुरसाशि
रसादृशावचसामनसाचेतिप्रणामोऽष्टांगईरितः भू

मोनिपत्ययः कुर्य्यात्कृष्णस्य ध्यानमतिः सुधीः सह
स्वजन्मजेषाणं त्यक्त्वा वैकुंठमाप्नुयात् नवीननीरद
श्यामं नीलेन्दीवरलोचनं वल्लवीनन्दनं वन्दे कृष्णं गो
पालरूपिणं स्फुरद्बर्हदलोद्बद्धनीलकुंचितमूर्द्धजं क
दम्बकुसुमोद्बद्धवनमालाविभूषितं गण्डमण्डलसं
सर्गिचलत्कांचनकुण्डलं स्थूलमुक्ताफलोदारहा
रोद्द्योतितवक्षसं हेमांगदतुलाकोटिकिरीटोज्ज्वल
विग्रहं मन्दमारुतसंक्षोभवल्गिताम्बरसंचयं रु
चिरोष्ठपुटन्यस्तवंशीमधुरनिस्वनैः लसद्गोपालि
काचेतो मोहयंतं मुहुर्मुहुः वल्लवीवदनाम्भोजमधु
पानमधुव्रतं क्षोभयंतं मनस्तासां सस्मेरापांगवीक्ष
णैः यौवनोद्भिन्नदेहाभिः संसक्ताभिः परस्परं विचित्रा
म्बरभूषाभिर्गोपनारीभिरावृतं प्रभिन्नांजनकालिन्दी
जलकेलिकलोत्सुकं योधयंतं क्वचिद्गोपान्व्याहृ
यंतं गवां गणं कालिन्दीजलसंसर्गिशीतलानिलक
म्पिते कदम्बपादपच्छायेस्थितं वृन्दावने क्वचित् र
त्नभूधरसंलग्नरत्नासनपरिग्रहं कल्पपादपमध्य
स्थहेममण्डपिकागतं वसंतकुसुमामोदसुरभीकृ
ते दिग्मुखे गोवर्द्धनगिरौ रम्ये स्थितं रासरसोत्सुके
सव्यहस्ततलन्यस्तगिरिवर्य्यातपत्रकं खण्डिताख
ण्डलोन्मुक्तमुक्तासारघनाघनं वेणुवाद्यमहोल्लास
कृतहुंकारनिस्वनैः सवत्सैरुन्मुखैः शश्वद्गोपाले

गो· तं· ३२

32

रभिर्वीजितं कृत्स्नमेवानुगायद्भिर्बल्लवैष्टावशवर्त्तिभिः द
ण्डपाशोद्यतकरैर्गोपालैरुपशोभिते नारदाद्यैर्मुनिवरै
र्वेदवेदांगपारगैः प्रीतिसस्निग्धया वाचा स्तूयमानं परात्
परं यएवं चिंतयेद्देवं भक्त्या संस्तौति मानवः त्रिसन्ध्यं तस्य
तुष्टः सो ददाति वरमीप्सितं राजवल्लभतामेति भवेत्
सर्वजनप्रियः अचलां श्रियमाप्नोति स वाग्मी जायते ध्रुवं
अथ मुद्राः प्रदर्श्याथ अग्निसंस्कारमाचरेत् मोदनात् सर्व
देवानां द्रावणात्पापसंततेः मुद्राख्याः कथिताः सद्भिर्देव
सान्निध्यदायिकाः गौतम उवाच भगवन्मे त्वया मुद्राः सू
चिता न प्रकाशिताः कथं विरचनं तासां कारुण्यात् ब्रूहि
मे गुरो नारद उवाच कनिष्ठांगुष्ठकौ शक्तौ करयोरितरे
तरं तर्ज्जनीमध्यमानामाः संहता भुग्नवर्ज्जिताः मुद्रैषा
गालिनी प्रोक्ता शस्ता गोपालपूजने वनमालभिनयवत्
कराभ्यामागलादथः जानुपर्यंतमिमिषा मुद्रा स्याद्वन
मालिका ओष्ठवामकरांगुष्ठो लग्नस्तस्य कनिष्ठिका दक्षि
णांगुष्ठसंयुक्ता तत्कनिष्ठा प्रसारिता तर्ज्जनीमध्यमा
नामाः किंचित् संकोच्य चालिताः वेणुमुद्रेहकथिता सु
गुप्ता प्रेयसी हरेः अंगुलीः संहताः कृत्वा करयोर्वामदक्ष
योः वामनासासमायुक्ता दक्षपाणिकनिष्ठिका दक्षस्य
मध्यमाक्रान्ता वामहस्तस्य तर्ज्जनी वाममध्यमयाक्रान्ता
दक्षहस्तस्य तर्ज्जनी संयुतौ कारयेद्विद्वानंगुष्ठावुभयो
रपि धेनुमुद्रा निगदिता गोपिता साधकोत्तमैः करौ सं

पुटितौ कृत्वा वामपाणिकनिष्ठिका निष्पीड्य दक्षपा-
णिस्थदक्षिणांगुलिभिर्दृढं तथा वामांगुलिभिर्वैरतिग-
ढं निपीड्येत् तृतीये बिल्वमुद्रास्यात् प्रशस्ताकृ सपूज-
ने कायेन मनसा वाचा बुध्याबुध्या च यत्कृतं इहजन्मनि
पूर्वस्मिन् अथवा पापसंचयं हृमाज्ञाननयोजनेन तत्त्वं च
त्यास्युन संशयः देवाः सर्वे नमस्यन्ति प्रणम्यन्ति तथा जनाः
कामधुग्वार्थ्यविधिवन्निक्षिप्य हृदयोपरि कृत्वेतरं करं वा-
मे कृत्वा सम्यक् समांगुलीः अन्योन्यपृष्ठकरयोर्मध्यमा-
नामिकांगुलीः वामकनिष्ठया दक्षकनिष्ठां च निपीड्य
च वामानामिकया दक्षतर्जनीं च निपीडयेत् वामांगुल-
त्रयोपरि कुर्यात् दक्षिणहस्तांगुलित्रयं एकत्र योजितं कृ-
त्वा मुद्रास्यात् कौस्तुभाभिका दक्षिणमणिवन्धे च वामां-
गुष्ठं नियोजयेत् मुद्रेयं कौस्तुभाख्या लोकादर्शनीयाथ
त्वतः कृत्वेतरं करं वामे कृत्वा सम्यक् समांगुलीः तर्ज-
न्युपरि वामं च न्यसेत् करतले ततः अंगुष्ठौ चालनीयौ
च मत्स्यमुद्रेच मीरिता करौ संपुटितौ कृत्वा मणिवन्धौ
संयोजितौ अंगुष्ठं च कनिष्ठं च प्रविधाय संयोजिते शेषा
अंगुलयः सर्वाउभयोर्वामध्यगाः परस्परमसंलग्नाः शू-
न्यमध्ये च कारयेत् उक्ता कलसमुद्रेयं गोपालार्चावि-
धौ शुभा कृत्वेतरे करतले अन्यतरांजलिसंपुटे अन्योन्य-
मति संलग्न अंगुष्ठान्तरमाहिते कथिता कूर्ममुद्रेयं
सर्वतन्त्रेषु गोपिता अथाकुंचिते ततः कृत्वा वामांगलि च

गौ· तं· ३३

33

तद्द्वयं प्रसार्य्यैव तदंगुष्ठं दलहस्तेन वेष्टयेत् प्रसार्य्येत
र्जनीं दलान्तदंगुष्ठेच मंत्रवित् शंखमुद्रेयमुद्दिष्टा दर्श
नात् पापनाशिनी इति गौतमीये महातंत्रे दशमोऽध्या
यः १०॥ अथाग्निजननं वक्ष्ये स्वस्वमंत्रानुसारतः धर्म्मार्थ
काममोक्षाणां यत् कृत्वा फलमश्नुते गोमयांतः समालि
प्य कुण्डे सर्वत्र मंत्रवित् सामान्यार्घ्यं प्रकल्प्याथ पंचगव्ये
न सेचयेत् त्रिकोणं तद्बहिः षट्कोणं च पद्मं प्रकल्पयेत्
चतुरस्रं च तद्बाह्ये एवं वा वह्निमण्डलं कुण्डस्योत्तरभागे
च त्रिरेखां हस्तमात्रकं दक्षिणोत्तरतस्ततः कुर्य्याद्रेखा
त्रयं शुभे अर्च्चाद्भिः प्रोक्ष्य सर्व्वं हि पंचशुद्धिं समाचरेत् वी
क्षणं मूलमंत्रेण कवचेनाथ लेपयेत् अस्त्रेण रक्षितं
कृत्वा वह्नेः संस्कारमाचरेत् पाषाणभवमग्निं वा अथवा
योनिसम्भवः श्रोत्रियाणां गृहोत्थं वा वनस्थं वाथवाह
रेत् यदृच्छालाभसंप्राप्तो योग्योऽयं होमकर्म्मणि निर
ग्निब्राह्मणाल्लब्धो सर्वलाभकरो भवेत् तत्र वन्यस्य त
र्थीशफलं दद्याद्धुताशनः वेश्यात् शूद्राच्च विफलं जाय
ते होमकर्म्मणि तस्मात् सर्वप्रयत्नेन वह्निमुक्तं समाह
रेत् आनीय कांस्यपात्रस्थं क्रव्यादांशं परित्यजेत् क्रव्या
देभ्यो नमस्कृत्य प्रणवाद्यो मनुर्भवेत् रेखाणां मुद्गराग्रा
णां बलि वैवस्वतेन्द्रवः प्रागग्राणां च रेखाणां मुकुन्देशपु
रन्दराः ततो वह्नेर्योगपीठमर्च्चयेत् कर्णिकोपरि धर्म्म
ज्ञानं च वैराग्यमैश्वर्य्यमादितो यजेत् पूर्वादिदिक्षु वा सर्व्वा

न् तथा धर्म्मादिकान् यजेत् मध्ये च पूजयेद्वह्नेर्नप्रधा
न्को विधानवित् पीता श्वेतारुणा कृष्णा धूम्रा तीव्रा स्फु
लिंगिनी रुचिरा ज्वालिनी प्रोक्ता कृशानोर्णव शक्तयः
श्रमर्कमण्डले पूज्यं ज्वं सोममण्डले यजेत् मेवह्निमण्डले
तदर्च्चयेद्गन्धपुष्पकैः वागीश्वरीमृतुस्नातां नीले
न्दीवरसन्निभां वागीश्वरेण सहितामुपचारैः प्रपूजयेत्
शक्तिप्रणवबीजाभ्यां तयोर्ध्वनमीरिते वागीश्वरीमृत
मतीं पुरुषाधिष्ठितां स्मरेत् वह्निं संस्कृत्य पात्रस्थं वी
जेन तं मंत्रयेत् चैतन्यं प्रणवेनैव योजयन्तं प्रपूजये
त् आत्मनोऽभिमुखं वह्निं जानुष्टमहीतलः शिवबि
जायिया देव्या योनौ वह्नेविनिक्षिपेत् ततो देवाय देव्यै च द
द्यादाचमनीयकं गर्भनाड्याः एतद्ध्यायेद्वह्निरूपं परंगु
रुः पश्चाद्गर्भस्य रक्षार्थं प्रदद्याद्दर्भकंकणं भूषाभिभू
षयोद्देवीं त्रैलोक्यात्पत्तिमातृकां रेफवायुषदस्वरेश्च
नादबिन्दुविभूषिताः सादिषान्ताश्च जिह्वानां मनवः परि
कीर्त्तिताः पादयोर्लिंगे तथा नाभौ हृदये कंठमूलतः लम्बि
कायां भ्रुवोर्मध्ये जिह्वाज्वाला रुचौ न्यसेत् हिरण्या कनका
रक्ता कृष्णा सुप्रभा मता बहुरूपातिरक्ता च जिह्वाः स
प्तयोनितः सहस्रार्च्चिः स्वस्तिपूर्ण उत्थितः पुरुषस्तथा
धूमव्यापी सप्तजिह्वाश्चतुर्धारः इति स्मृतः षडंगमंत्रा वह्ने
स्तु प्रणवाद्या नमोऽन्तकाः हृदयादिक्रमेणैव मलल्या
स्त्रांगदेवताः मूर्द्धिण स्कन्धे तथा पार्श्वे कसोत्तकटिपार्श्व

ग्रो॰ तं॰ ३४
34

के स्कन्धे मूर्ध्नि च विन्यस्य प्रादक्षिण्यक्रमेण तु जातवे
दाः सप्तजिह्वो हव्यवाहनसंज्ञकः अश्वोदरजसंज्ञोऽस्याग्
नेर्वैश्वानराह्वयः कौमारतेजा विश्वामुखोऽन्ने देवमुख
स्तथा एवं विमलदेहः सन् ज्वालयेन्मनुनामुना चित्पिं
गलस्तद्वयेदहद्वये तथापि च सर्वज्ञोज्ञापय स्वाहा मन्त्रो
यं समुदाहृतः अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनं
सुवर्णवर्णममलं समिद्धं सर्वतोमुखं समिद्धेनव मन्त्रेण
त्रिभिर्मन्त्रैर्हुताशने ज्वालयेन्मतिमान्मन्त्री अन्यथा वि
फलं भवेत् दर्भैः सगर्भैः शुद्धैश्च मूलमध्याग्रकादितैः
संस्तरेद्धि पिवन्मन्त्री प्रदक्षिणवशादथ एवं संस्तरणं
कुर्याद्धूर्जे पितान्मनो दिशा यत्तहतोड्वै स्तहत्कौश्च
परिधित्रयं मध्यस्थमेखलायां तु संस्तरे तत्र विन्नमः अ
यवेत् स्थण्डिले मन्त्री भूमौ सर्वं परिस्तरेत् गन्धादिभिः
समभ्यर्च्य वह्निं देवं विभावयेत् त्रिनयनमरुणाभं बद्ध
मौलिं शुक्लांशुकमरुणमणिकाकल्पमम्भोजसंस्थं
अभिमतवरशक्तिस्वस्तिकाभीतिमुद्रैर्मरकतकमलमा
लालङ्कृतांशं कृशानुं सुवर्णवर्णममलं लसत्स्वर्णो
पवीतकं चतुर्भुजं द्विशिरसं हव्यकव्यहितनासिकं कम
ण्डलुतालहस्तं शक्तिस्वस्तिकधारिणं चतुःश्रोत्रं शाह्व
यमानमनलं एवं वामनसा ध्यायेच्छान्तिकादौ गुरूत्तमः
हेमसंक्लसगते वर्णं ध्यायेन्मारणकर्म्मणि मूर्तिरष्टौ स
मभ्यर्च्य षट्कोणेन तु षडङ्गकं मध्ये जिह्वायं जेष्ठ द्वैवी ह्रूं

तन्मंत्रेनायजेत् वैश्वानरपदं पूर्वं जातवेदमनंतरं
लोहिताक्षं ततस्तोकारहावह ततः परं सर्वकर्माणि
देहिमेस्वाहामनुःसमुद्धितः आज्यस्थालीं समानीय तत्रा
लयेदल्लमुद्धरन् कुएैःङ्गगरान् समुत्तोल्य न्यसेत्तद्योग
मेत्रतः तस्यामाज्यं विनिक्षिप्य जानीयात्तापनेहितेषु ज्वा
ल्यकुशगुच्छं तत्राज्ये क्षिप्त्वानले क्षिपेत् अभिद्योतनमि
त्युक्तं सर्वत्र सर्वकर्मसु पुनः कुशान् समुज्वाल्य निक्षि
पेदाज्यमध्यतः मूलमंत्रेणमतिमानाज्यसंस्कार ईरितः
अभिमंत्र्य च मूलेन रक्षयेदर्भमुद्धरन् अदर्शपवित्रयोनी
च आज्यं तदमृतात्मकं स्रुक्स्रुवौ च समादाय विधिना
निर्मितौ गुरुः शिशुः प्रतापयेद्वह्नौ पुनः प्रक्षाल्य वारि
णा पुनः प्रतप्य तौ मन्त्री स्थापयेत्तौ स्वदक्षिणे प्रादेश
मात्रं समग्रं छित्वा दर्भं युग्मं हुते क्षिपेत् कृत्वा भागौ श्रुक्स्रुक्
स्रुपातौ स्कन्दनाद्विनाडिकाः वामदक्षमध्यभागेषीडाद्याः
संस्मरेत्ततः श्रुवेण दक्षिणाद्भागादादाय स्वाहयामुना ज
हुयादाज्यमादाय वह्नेर्दक्षिणलोचने वामतस्तद्वदादाय
सोमायस्वाहया ततः मंत्रेणानेन जुहुयादग्नेर्वामविलो
चने मध्यात्तद्वत्समादाय अग्नेर्भालस्थलोचने जुहुयाद
ग्निसोमाभ्यां स्वाहेति मन्त्रनामुना हुंमंत्रेण श्रुवेणाज्य
भागादादाय दक्षिणात् जुहुयादग्नये स्विष्टिकृते स्वाहेति
तन्मुखे इत्यग्नेर्नेत्रवक्त्राणां कर्ण्योद्घाटनं गुरुः पुनश्चा
हुतिभिर्हुत्वा जिह्वाग्रं मूर्त्तितो हुनेत् वैश्वानरेणमंत्रेण

गो॰
तं॰
३५
35

त्रिवारंजुहुयाद्दग्धुं संस्कारार्थंततोवह्नेर्हुनेत्रवनवा
हुतीः प्रणवाद्यनमतिमान् स्वाहान्तेनतदुच्चरन् गर्भा
धानंपुंसवनंसीमंतोन्नयनंतथा जातकर्मतथानामक
पनिष्क्रमणंतथा चूडोपनयनेभूयोवेदाध्यायनमेवच
गोदानंचविवाहंचसंस्काराःशुभकर्मणि अशुभेमरणा
न्तानेपृथक्कालेत्रवेदिभिः ततस्थापितरोवह्नेःसंपूज्यहृ
दयेनयेत् वह्निमंत्रेणविधिवद्याहुतिपंचकं समिधः
पंचजुहुयान्मलाग्रघृतसंप्लुताः गुरुर्हृदयमंत्रेणवि
धिवत् स्वाहयाविना महागणेशमंत्रेणहुनेदेकादशा
हुतीःसामान्यसर्वदेवानामेतदग्निषु विस्तरे वह्निरूपा
यांचजिह्वायामावाह्यपरमेश्वरं गन्धादिभिःसमभ्यर्च्यजु
हुयात् षोडशाहुतीः मूलमंत्रेणविधिनावक्त्रैकी
करणंत्विदं पुनस्तेनैवजुहुयादाहुतीःपंचविंशतिना
डीसन्धानशुद्धिंचवह्निदेवनयोरपि अंगादिपरिवाराणा
मेकैकामाहुतिंहुनेत् पुनर्व्याहृतिभिर्हुत्वाहोमंकुर्या
द्यथाविधि तिलेनाज्येनजुहुयात्सहस्रादियथावि
धि अनुक्तेनहविर्द्रव्येतिलाज्यंहविरुच्यते जुहुयात्क
मलंवामधुरत्रयसंयुतं पायसंमधुरोपेतंजुहुयाद्वायथा
मतिः आस्यान्तर्जुहुयाद्वह्नेःपण्डितःसर्वकर्मसु वधि
रंतेकर्णहोमेनेत्रेत्वन्धतमाप्नुयात् नासिकायांमनःपी
डाशिरोहोमीहिमस्मदः यतःकाष्ठंततःश्रोत्रंयतोधूमो
ऽयनासिकायतोऽल्पज्वलनंनेत्रंयतोभस्मततःशिवःयतः

प्रज्वलितो वह्निस्तस्मिंस्त्वं जातवेदसः । एवं होमं समाधा
य मतिमान् अपयेच्चरुं । पात्रेणाम्नमये शुद्धे गव्येन का
पिलेन वै । शुद्धेनाज्येन संभूते प्रस्ते विंशतिं क्षिपेत् । हु
तधारां ततो दद्याद्यावत्स्विन्नो भवेच्चरुः । आवतार्य त
तो विद्वान् भागत्रयमथाद्वयेत् । अथाचरेत् भागमेकं स
मादाय नित्यहोमं समाचरेत् । कुण्डे वा स्थण्डिले मंत्री स्थ
ले वा शोधिते तथा । एकहस्तामिते देशे कुशापुष्पाम्बुसे
विते वह्निं तत्र समाधाय जातवेदो मनोर्जपेत् । मंत्रं जपे
त् आहुतिभिस्ततो हुत्वा कल्पमावास्य भक्तितः । गन्धा
दिभिः समभ्यर्च्य मूलेन पंचविंशतिं । आहुतीर्जुहुयान्म
न्त्री षडंगहोमं समाचरेत् । ततो गम्भुं ततो भूत्वा नमस्कृत्य
च मंत्रवित् । विसृजेद्वह्निं तु गेयाग्नि नित्यहोमोऽयमीरि
तः । स्वगृह्योक्तविधानेन वलिवैश्वमथाचरेत् । भागद्वय
मथ चरोः कृत्स्नाय विनिवेदयेत् । एकभागं स्वयं भुक्त्वा शि
ष्टं शिष्यं समर्पयेत् । शायीत संयतः शिष्यः कम्बले पला
ले वा कुशास्तरे । भूतेश्वरस्य मंत्रेण स्वशिखां विवन्धयेद्
गुरुः । ततः शयीत तां रात्रिमधिवासोऽयमीरितः । इति गौ
तमीये एकादशोऽध्यायः ॥ ततः प्रातः समुत्थाय कृत
नित्यक्रियो गुरुः । कृतकृत्योऽपि शिष्यस्तु निषीदेद्गुरु
सन्निधौ । कथयेद्याविहृतां तेन शुभं वा यदि वाशुभं । स्त्रमं
गलीति नारीभिः सह संभोजनं मिथः । गिरिशृंगारोहणं
वरूल्यश्वरथ्यारोहणं । आरोहणं सौधगेहे देवान्तसवनि

गीतएं मंगलेचस्त्ववामोशादर्शनेस्पर्शनेतथा मंत्रसि
द्धस्पलिंगानिप्रोक्तानितवसत्रत ग्रनाकुलानिकथये
स्पृणनिच्यानिसर्वतः कुलस्ववर्णैर्भटैःखमेषहारस्तैलले
पने विप्राणांरोषवादेचपरस्त्रीणांनिषेवणंसिद्धिविघ्ना
निचोक्तानि ग्रन्यानिनिन्दितानिच पवदोषसमाज्ञायत
णात् परिहरेदगुरुः होमंकुर्यात्सहस्रादिद्रव्यैःकल्प
कदर्शितैः सांगंसपरिवारंवहुत्वावलिमथाचरेत् मएड
लस्यवहिर्भागेलोकेशादिवलिंहरेत् नक्षत्राणांसवाराणां
सराशीनांयथाक्रमं गन्धाद्यैःसम्यगभ्यर्च्यतत्रनमैत्रैस्तुमं
त्रवित् मुद्रात्रेनत् दद्याद्वलिंगन्धपुष्पधूपदीपकमादरा
त् नाराणामश्विन्यादीनांराशिःपादाधिकद्वयंमेषादिशु
क्तानलत्रसंस्ताधूर्वमनन्तरं देवताभ्यःपदप्रोक्तादिवान
केवदेत्तथा चरेभ्यस्थापसर्वेभ्योभूतेभ्यश्चनमोवदेत् प
वेराशीन्संपूर्णान्तस्मिंस्तद्वत्प्रयोजयेत् तथाराशपधि
पानांच ग्रहाणांतत्रतत्रतुमीनमेषांतरालेतत्करणानां
वलिंवदेत् मेषस्यवृश्चिकस्यारः शुक्रोवृषतुलाधिपः
वुधश्चैवकन्यकानाथस्तुल्यश्चकर्कटाधिपः सिंहराशपधि
पोभानुश्चापमीनाधिपोगुरुः मकरस्यापिकुम्भस्यमन्दो
राशपधिपाइमे लोइन्द्रायेसादिविस्पपारिपूदमर्च्येत्तथा
दद्याद्वलिंदिगीशेभ्याविधिनष्यगुरुत्तमः ॐ अश्विनीदेव
ताभ्योदिवानक्तंचरीभ्यःसर्वभूतेभ्योनमः भरणीकृत्ति
कापादेदेवताभ्योदिवानक्तंचरीभ्यःसर्वभूतेभ्योनमः

कृत्तिकात्रिपादरोहिणीदेवताभ्योदिवानक्तंचरीभ्यः
सर्वभूतेभ्योनमः कृत्तिकात्रिपादरोहिणीदेवताभ्योदि
वानक्तंचरीभ्यः सर्वभूतेभ्योनमः रोहिणीमृगशीर्षपू
र्वार्धाद्वेदेवताभ्योदिवानक्तंचरीभ्यः सर्वभूतेभ्योनमः
मृगशीर्षोत्तरार्द्धेदेवताभ्योदिवानक्तंचरीभ्यः सर्वभूतेभ्यो
नमः आर्द्रापुनर्वसुत्रिपाददेवताभ्योदिवानक्तंचरीभ्यः
सर्वभूतेभ्योनमः पुनर्वसुपादपुष्यदेवताभ्योदिवान
क्तंचरीभ्यः सर्वभूतेभ्योनमः आश्लेषादेवताभ्योदिवा
नक्तंचरीभ्यः सर्वभूतेभ्योनमः मघादेवताभ्योदिवान
क्तंचरीभ्यः सर्वभूतेभ्योनमः पूर्वफल्गुण्युत्तराफल्गु
णीपाददेवताभ्योदिवानक्तंचरीभ्यः सर्वभूतेभ्योनमः
उत्तराफल्गुणीद्विपादहस्तादेवताभ्योदिवानक्तंचरी
भ्यः सर्वभूतेभ्योनमः हस्ताचित्रार्द्धेदेवताभ्योदिवान
क्तंचरीभ्यः सर्वभूतेभ्योनमः हस्ताचित्रार्द्धेदेवताभ्यो
दिवानक्तंचरीभ्यः सर्वभूतेभ्योनमः चित्रोत्तरार्द्धस्वाती
देवताभ्योदिवानक्तंचरीभ्यः सर्वभूतेभ्योनमः स्वातीवि
शाखात्रिपाददेवताभ्योदिवानक्तंचरीभ्यः सर्वभूतेभ्यो
नमः विशाखापादानुराधात्रिपाददेवताभ्योदिवान
क्तंचरीभ्यः सर्वदेवताभ्योनमः ज्येष्ठादिदेवताभ्योदि
वानक्तंचरीभ्यः सर्वभूतेभ्योनमः मूलादिदेवताभ्यो
दिवानक्तंचरीभ्यः सर्वभूतेभ्योनमः पूर्वाषाढोत्तराषा
ढापाददेवताभ्योदिवानक्तंचरीभ्यः सर्वभूतेभ्योनमः

उत्तराषाढश्रवणादेवताभ्यो दिवानक्तंचरीभ्यः सर्व
भूतेभ्योनमः श्रवणाधनिष्ठार्द्धदेवताभ्योदिवानक्तं
चरीभ्यः सर्वभूतेभ्योनमः धनिष्ठार्द्धशतभिषगदेवता
भ्योदिवानक्तंचरीभ्यः सर्वभूतेभ्योनमः शतभिषकपू
र्वभाद्रपदत्रिपाददेवताभ्यो दिवानक्तंचरीभ्यः सर्वभू
तेभ्योनमः पूर्वभाद्रपदोत्तरभाद्रपददेवताभ्यो दिवा
नक्तंचरीभ्यः सर्वभूतेभ्योनमः रेवतीदेवताभ्योदिवा
नक्तंचरीभ्यः सर्वभूतेभ्योनमः मेषाश्विनीभरणीकृ
त्तिकापाददेवताभ्योदिवानक्तंचरीभ्यः सर्वभूतेभ्योन
मः वृषभकृत्तिकात्रिपादरोहिणीमृगशिरः पूर्वार्द्धदेव
ताभ्योदिवानक्तंचरीभ्यः सर्वभूतेभ्योनमः मिथुनमृग
शिरार्द्धपुनर्वसुत्रिपाददेवताभ्योदिवानक्तंचरीभ्यः
सर्वभूतेभ्योनमः कर्कटपुनर्वस्वेकपादपुष्याश्लेषदे
वताभ्योदिवानक्तंचरीभ्यः सर्वभूतेभ्योनमः सिंहमघा
पूर्वोत्तरापाददेवताभ्योदिवानक्तंचरीभ्यः सर्वभूतेभ्यो
नमः कन्योत्तरात्रिपादहस्तचित्रार्द्धदेवताभ्यो दिवानक्तं
चरीभ्यः सर्वभूतेभ्योनमः तुलाचित्रोत्तरार्द्धस्वातीविशा
खात्रिपाददेवताभ्योदिवानक्तंचरीभ्यः सर्वभूतेभ्योन
मः वृश्चिकविशाखापादानुराधाज्येष्ठादेवताभ्योदिवा
नक्तंचरीभ्यः सर्वभूतेभ्योनमः धनुर्मूलपूर्वाषाढोत्तरा
षाढपाददेवताभ्योदिवानक्तंचरीभ्यः सर्वभूतेभ्योनमः
मकरोत्तराषाढत्रिपादश्रवणाधनिष्ठार्द्धदेवताभ्योदिवा

नक्तंचरीभ्यः सर्वभूतेभ्योनमः कुम्भधनिष्ठाशतताराईश
तभिषकपूर्वभाद्रत्रिपाददेवताभ्योदिवानक्तंचरीभ्यः
सर्वभूतेभ्योनमः मीनपूर्वभाद्रपदउत्तरभाद्ररेवती
देवताभ्योदिवानक्तंचरीभ्यःसर्वभूतेभ्योनमः श्रावर
णादेवताभ्योनमः शुक्रदेवताभ्योनमः बुधदेवताभ्यो
नमः चन्द्रदेवताभ्योनमः आदित्यदेवताभ्योनमः बृह
स्पतिदेवताभ्योनमः शनैश्चरदेवताभ्योनमः सिंहदेव
ताभ्योनमः व्याघ्रदेवताभ्योनमः वराहदेवताभ्योनमः
खरदेवताभ्योनमः गजदेवताभ्योनमः वृषभदेवता
भ्योनमः कुक्कुरदेवताभ्योनमः हरदेवताउग्रगुह्यवि
स्वब्रह्मलक्ष्मीधनाधिपाद्वारदेवता इत्युक्तातेभ्योवलिं
हरेद्गुरुः इत्ययंवलिविधिःप्रोक्तःसर्वविघ्नोघनाशनः
गोपुच्छमथिकंतस्मात्तेणेगात्तरणंभवेत् जम्बीरंकलि
ह्वतेवतस्मात्चैवेथांसिकल्पयेत् गुडसिन्दूरवालार्कवर्णै
वह्निः सुशोभनः भेरीवादित्रगम्भीरशाह्नोवह्निःशुभप्रदः
चन्द्रचन्दनकुन्दाभधूमःसर्वार्थसिद्धिदः खरवायसव
च्छेन्नोवह्निःसर्वविनाशकृत् कृत्स्नःकृष्णातेवर्णोराज्य
वापिविनाशयेत् पूर्णाहुतिंततोदद्यात्सम्यिग्वेवविधा
नवित् ॐभूरग्नयेपृथिव्यैमहतेस्वाहयाततःभूवोवा
यवेचांतरीक्षायचदिवेवमहतेचस्वाहयाततः स्वश्चन्द्र
मसेदिग्भ्यश्चनक्षत्रेभ्यःस्वाहा ॐभूर्भुवःस्वश्चन्द्रमसे
नक्षत्रेभ्यश्चदिग्भ्यश्चमहतेस्वाहा स्वकस्त्रवोचममात्र

गौ॰
तं॰
३८

य हुतेनार्घ्यं ततो पुनः होमद्रव्याणि निक्षिप्य नाभौ सं
स्थाप्य ततो पुनः ब्रह्मार्पणेन मनुना दद्यात् पूर्णाहुतिं पु
नः इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्न
सुषुप्त्यवस्थासु च मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्या
मुदरेण शिश्नायत् स्मृतं यदुक्तं यत्कृतं तेन तत्सर्वं ब्रह्मा
र्पणं भवतु स्वाहा ब्रह्मार्पणमनुः सोऽयं ब्रह्मार्पणवि
धौ स्मृतः इति श्रीगौतमीये द्वादशोऽध्यायः एवं होम
विधिं कृत्वा कुण्डस्थण्डिलदेवताः दिक्पालदेवताश्चा
पि श्रीकृष्णार्पणाद्देवता आनयेत् कलसं चापि कृत्वैकं भा
वयेद्गुरुः कृत्संस्थया पूतेनीत्वा शिष्यमारूपतंत्रवित्
वामस्थाने त्वेव श्रीया त्र्यम्बमंत्रेण यत्नतः पाचयित्वा पंचाग
व्यमद्यामृतमध्यं शुभं स्पृष्ट्वा तेन त्र्यम्बमंत्रेणोऽध्वषट्कं वि
शोधयेत् विलृत्वा तिसं शोध्य त्र अभिषेकगृहं नयेत्
वर्णाः कलापदं तत्त्वं मंत्रो भुवनमेव च अध्वषट्कमिति
प्रोक्तं मुनिभिस्तत्त्ववेदिभिः वर्णाध्वा वर्णं शाखेश्वफला
न्याषडभिरीरिता पादाध्वा पदसमूहः स्यात तत्त्वाध्वा पंच
विंशति षट्त्रिंशद्देवं तत्त्वानि इति तत्त्वविदो विदुः मंत्रा
ध्वा मंत्रराशिः स्यात्ते हि वै दिक्तं त्रिकाः भुवनाख्येति क
थिता भुवनानि चतुर्दश शोधयाम्यमुमध्वानममुकस्य
हि पर्वतः वेदगर्भो नमस्यान्ते मन्त्र अध्वविशोधने नवाहु
ती गुरुः कुर्यात् एकैकाध्वविशोधने हस्ते गृहीत्वा तं शि
ष्यमभिषेकगृहं नयेत् निवेश्य पमातृकायंत्रे सेचयेत्तक

लमास्तैः हंसात्तु भव पूर्णात्मा आचार्यस्थानयेद्वरं
गोरोचनापल्लवानि कल्पवृक्षस्थियामरुधन् शिशोः शि
रसि संयोज्य विलोममातृकां जपेत् मूलमंत्रं तथाजप्ता
कुर्याद्देवाभिषेचने हंसात्मकं ततस्तोयं शिवआदिप
दावधि अभिषिंचेत्तेन मंत्री हंसात्मा भवति ध्रुवं तनौष
धिकलाभिन्नजलं हंसात्मकं भवेत् तेन तत्संकमात्रे
ण शिशुः हंसेन चात्मस्था पूर्वयः कुरुते भक्त्या आत्मानं
विसृज्य संस्कृतं इह भुक्त्वा यथाकामं देहांते तत्पदं व्रजेत्
चंदनालेपितांगश्च द्विजाशीर्भिश्च संयुतः हंसात्मकं
देशिकं तं प्रणम्य च पुनः पुनः निषीदेत् सन्निधौ तस्य
नियतो विनयान्वितः मायाजालेन संदेहे गुरुः सामरस्य
यत्नतः दक्षकर्णे वदेन्मंत्रं त्रिवारं पूर्णमानसः गणेशा
दिमनुं चोक्तक्रमयोगात् कथयेद्गुरुः मंत्रार्थं मंत्रबीजं
च तच्छक्तिं तत्कलापि च आत्मानं दर्शयेत्साक्षात्तस्य
नाम्नात्मनस्ततः मंत्रकुण्डलि देवानाम कार्यं तं प्रका
शयेत् सिद्धांते वै सर्वं यत्नाद्बोधयेत् कृपया गुरुः
एकं चोपदिशेच्छिष्यं यथा तन्मयतां व्रजेत् यथा ग्राम
शतं तोयं विष्ठादिमूत्रदूषितं गंगायां मिलितं तद्गंगे
व भवति ध्रुवं यथा मात्मासाम मेयत्र पातीतो भवेच्छिशुः
शिष्योऽपि पूर्णतां ज्ञात्वा गुरुं यत्नेन तोषयेत् गुरवे दक्षि
णां दद्याद्धिरण्याई भक्तितत्परः तदर्द्धं वा ततो दद्यात् य
थाशक्त्याथ भक्तितः वित्तशाठ्यं न कुर्वीत कृतेनार्थं स

गौ· तं·
३९

माहरेत् गोभूहिरण्यवस्त्रादीन् गुरवे ऽर्थ निवेदयेत् गुरु
पुत्रे ऽपि तत्पत्न्यां ताभ्यां ऽपि स्वशक्तितः वस्त्रालंकर
णं दद्याद्भोज्यमिष्टं यथारुचि ऋत्विग्भ्यो दक्षिणां दद्या
द्वस्त्रालंकारभूषितं सान्तं तर्पयेद्भक्त्या यथाविभववि
स्तरात् ततः प्रभृति मंत्रज्ञो गुरुशासनसंस्थितः यथा मं
त्रे तथा देवे यथा देवे तथा गुरौ ऽप्यभेदभेदतो मंत्री एवं भ
क्तिक्रमो मुने अभक्तिं जनयेंल्लोके देवताक्लेशदायकः
त्रिदिने निवसेद्भक्त्या सिद्धये गुरुसन्निधौ अन्यथा तद्भते
तेजो गुरुमत्ति न संशयः इति श्रीगौतमीये त्रयोदशो ऽ
ध्यायः ।। वैशाखमासे तु वा कृत्वा शुभे गुरुशासनात्
द्वादश्यां शुक्लपक्षे च माघे वा सिततिथौ आरभेद म-
लायां वे पुरश्चर्यां स सिद्धये जपहोमौ तर्पणं च सेकोब्रा
ह्मणभोजनं पंचांगोपासनं लोके पुरश्चरणमुच्यते अ
थो पुरस्क्रियां कर्त्तुं कुर्याद्भूमेः परिग्रहं भिक्षाचारविहि
रा यततः ऽर्ह्हं न लंघयेत् जीवहीनो यथा देही सर्वकर्म
सु न क्षमः पुरश्चरणहीनो ऽपि तथा न स्यात्फलप्रदः
पर्वताग्रे नदीतीरे गोष्ठे देवालये तथा पुण्यारण्ये महा
तीरे समुद्रस्य निजे गृहे तुलसीकानने रम्ये विल्वमूले
च शास्यते विमले चैव विधिवत् सिद्धये जपमारभेत् पु
रश्चरणकर्म श्रीभक्ष्याभक्ष्यं विचारयेत् अन्यथा भोजना
दोषात् सिद्धिहानिः प्रजायते सतकुलस्यान्नजातानि
प्रचीनां श्रीमन्तां सतां गृहस्थानं वदाम्यानां भीतान्नाशिनोः

॰ग्रजन्मनां भुंजानो वा हविष्यान्नं शाकं च विहितं तथा फ
लं क्रमुकं केलूनां वर्ज्जयेत् विहितं मुने पयोदधिफलं
वापि नारिकेलं यथोदितं हविष्यं वा तथा स्त्रियान्नं शाकं प
वसमुद्भवं रम्भाफलं तिन्तिडीकं कमलानागरंगकं फ
लान्येतानि भोज्यानि एषामत्यानि वर्ज्जयेत् पेलवं वर्ज्जये
न्माद्रीशार्करैलवं वर्ज्जितं लवणं त्वारमन्नं वरं जनं काश्य
मेव च ताम्बूलं च विभक्तं चतुःसभायस्य यत्नतः श्रुतिस्मृति
विरोधं च जंपगान्नं च वर्ज्जयेत् भूपाध्यो ब्रह्मचारितं मोतं च
पत्नसूयतो निसेत्रिसवने स्नाने त्वइकम्म विवर्ज्जितं ।
नित्यपूजा नित्यदानं देवतास्तुति कीर्त्तनं नैमित्तिकाद्यं नैव
व विप्रासो गुरुदेवयोः जपनिष्ठास्त्वादशे तेय धर्म्मास्तु सम्मेव
स्त्रिडिदः नित्यं सूर्य्यमुपस्थाय तस्य चाभिमुखो भवेत् दे
वतावतिमानसे च वन्हो चाभ्यर्च्चितं मुखः अनिर्वेदस्तथा
व्यग्रः श्राद्ध स्त्रीकाचारपालकः स्नान पूजा जप ध्यान होम त
र्पणतत्परः निष्कामो देवता धेव सर्वकर्म्मनिवेदकः
एवमादीन्नियमान् प्रवक्ष्यामि रणमुच्यते शक्तो त्रिसवनं
स्नानं अम्मध्याह्निः सकृत्तथा अस्नातस्य फलं नास्ति न चा
तर्पयतः पितॄन् अमेध्यसम्भवे देहं जलादिन्द्रिय शुद्ध
ता तस्मान्मुखोजलस्नाने सर्वेषामुनिभिर्म्मते नवीज्ये
त्पतितं ग्रामं पिशुनं वेदनिन्दकं तथानाश्रमिणे विप्र ।
विस्तवस्य विनिन्दिकं अतन्तकालं विनामंत्री स्वस्त्रियं नापि
संस्पृशेत् मैथुनं तत्कथालापं तद्गोष्ठीं परिवर्ज्जयेत् ।

गो॰ तं॰ ४॰ पर्वते सिन्धुतीरे वा पुण्यारण्ये नदीतटे यदि कुर्य्यात् पुरश्च
र्य्यां तत्र कूर्म्मं न चिंतयेत् ग्रामे वा यदि वा क्षेत्रे गृहे वा तं च
चिंतयेत् दीपस्थानं तथा चोक्तं मुखे पृष्ठे च मंत्रिणः दीप
५० स्थाने भवेत् सिद्धिर्नान्यथा कोटिजापनैः पूर्वोत्तरविभागे
न च ततः सूत्रं निपातयेत् नवकोष्ठं भवेदेतत् कूर्म्मदेहस
मन्वितम् पूर्वादिदिशि मंत्रज्ञः प्रदक्षिणक्रमेण तु कादिवर्गा
न् लिखेद्विद्वान् पंच पंच विभागशः यादिवर्गं शादिवर्गं
लक्षमीशे च संलिखेत् कूर्म्मस्यांगं च कूर्म्मवक्त्रं कुर्य्याद्दिग्‌भा-
भा यथा भवेत् स्वराणां युग्मयुग्मं च मध्ये चाष्टस्वदिक्षु च
एवमष्टांगवान् कूर्म्मः सर्वेषां सिद्धिदीपकः दीपनार्थं लि
खेन्मध्ये पूजयेत्तं विभावयन् यस्मिन् दिशि पतेद्ग्रामा
यतनरेदश्यते तथा कूर्म्मवक्त्रं विजानीयात्तत्र सिद्धिरनुत्त
मा वक्त्रपार्श्वकोष्ठद्वे करौ कूर्म्मस्य विद्धि हि मध्ये कुक्षी
उभे ज्ञेये पादौ द्वौ शेषं पुच्छकं एवं कूर्म्मं विजानीयाद्दीप
चक्रविवेचकः मुखे सिद्धिर्भवेन्नूनं मध्ये सिद्धिश्च जायते
उदासीनः करस्थश्च कुक्षिस्थोऽदुःखमाप्नुयात् पादस्थः पी
ड्यते मंत्री बंधनोच्चाटनादिभिः पुच्छे मरणं भवेन्नूनमेवं
कूर्म्मस्य संस्थितिः मंत्रान्तरेण मंत्रं चेत् कूर्म्मं नाम्नो भवेत्
यदि साधकस्य च नाम्नाथ किं न सिद्ध्यति मंत्रिणः पंचा
शद्वर्णरूपेण ते त्रेशा विश्वविग्रहाः तस्मात्तु सगुणे तंत्र
सिद्धये स्यात्तु चान्यथा द्विगुणे चेन्मुखस्थोऽपि कोष्ठेन सिद्धि
माप्नुयात् तस्माच्चक्रं विचार्य्यैव मंत्रं चेत् सर्वसिद्धिदं यस्मि

न्देशेदीपपतिः सगुणोनाममंत्रयोः तत्रयत्नेनगंत
व्यंसपीठोडलभोमतः रुद्राक्षैरपिभद्राक्षैः पुत्रजीव
कुचन्दनैः स्फटिकैश्चप्रवालैश्चकुशग्रंथिभिरेवतथा॥
तथामलकसम्भूतैस्तुलसीकाष्ठनिर्म्मितैः पभिश्चमा
लिकांकुर्य्यान्मतिमान्वैष्णवेमतो रुद्राक्षसम्भवाया
तस्त्वनंतफलदामता पुण्ड्रीकाभवामालागोपालम
न्त्रसिद्धिदा जीवपुत्रभवायात्तुपुत्रंविन्दन्तेचिरात् कच
न्दनभवामालाराज्यभोगापवर्गदा प्रवालनिर्म्मिताया
तुसर्वैसत्ववशीकरीकुशग्रंथिभवामालाधर्म्महडिक
रीमता तुलसीसम्भवायात्तुमोक्षंविन्दन्तेःचिरात् अष्टो
त्तरशतैर्म्मालानिर्म्मितायात्तुमालिका राज्यंविन्दन्ते
न्तुणंदेहान्तेमोक्षदायिनी मालार्द्धीपंचविंशत्यापुत्रार्थी
त्रिंशताजपेत् चत्वारिंशन्मणिभिर्वाअभिचारायकेवलं
पंचाशन्मणिभिर्म्मालासर्वकर्म्मप्रसाधिका अकारादि
लकारान्तावातमालाप्रकीर्त्तिता क्षान्तेमेरुरूपत्वेनत्रकल
येन्मुनिसत्तम अनयासर्वमंत्राणांजपःसर्वसमृद्धिदः
नित्यजपंकरेकुर्य्यान्नतकाम्यमवोधनात् आरभ्याना
मिकामूलात्परिवर्त्तेनवैक्रमात् तर्ज्जनीमध्यपर्य्यंत
जेपदष्टसुपर्वसु गोपालेनत्रमंत्राणांकरमालेयमीरि
ता कार्पाससम्भवेसूत्रेपुण्यस्त्रीभिर्विनिर्म्मिते अथवाप
ट्टसूत्रेणस्वर्णसूत्रेणवातथा अणिमादिकमोक्षान्ताःसि
द्धयेस्वर्णसूत्रके पट्टसूत्रंवशीकरेधनपुत्रविवर्द्धने कार्पा

गौ॰
तं॰
४१

मसम्भवं सूत्रं धर्मकामार्थमोक्षदं त्रिगुणं त्रिगुणीकृ
त्य ग्रथयेच्छिल्पशास्त्रतः मुखे मुखं तु संयोज्य पुच्छे पुच्छं
नियोजयेत् गोपुच्छसदृशी माला यद्वा सर्पाकृतिः शुभाः
एवं निर्माय मालां वै शोधयेत्तन्निमित्तम अश्वत्थपत्रनव
कैः पद्माकारं तु कल्पयेत् तन्मध्ये स्थापयेन्मालां मातृ
कां मूलमुच्चरन् नित्यनैमित्तिकं कृत्वा सामान्यार्घ्यविधा
एव क्षालयेदीशसूक्तेन लिम्पेत्तत्पुरुषेण तु गन्धैरन्
न्यैर्म्मन्त्रिमान् अघोरेण तु धूपयेत् अघोरेणैव सूक्तेन श
तान्तेन तु मन्त्रयेत् वामदेवेन सूक्तेन शमीकुर्य्यात् द्विचत्व
णः एकैकमालामादाय ब्रह्मग्रन्थिं प्रकल्पयेत् एकैकमा
तृकावर्णेन ग्रथनादौ तु संजपेत् ततः सजातीयमेकाक्ष
मेव च त्रिः प्रकल्पयेत् एवं संग्रथितां मालां पुनः पञ्चोपरि
न्यसेत् तत्रावाह्य यजेद्देवं यथाविभवविस्तरैः मन्त्रयेत् सू
लमन्त्रेण क्रमेणातक्रमयोगतः तथैव मातृकावर्णैर्म्म
न्त्रयेन्मन्त्रतत्त्ववित् क्षालयेत् पञ्चगव्येन पुनरीशेन सूक्ततः
पुनर्विलिप्य गन्धेन जपेन्मन्त्रं यदृच्छया नान्यमन्त्रं जपे
न्मालां कम्पयेन्न विधुनयेत् कम्पनात् सिद्धिहानिः स्यात्
धूननं बहुदुःखकृत् शब्दे जाते भवेद्रोगः करभ्रष्टो विना
शकृत् छिन्ने सूत्रे भवेन्मृत्युस्तस्माद्यत्नपरो भवेत् जपा
न्ते कर्णदेशे वा उच्चस्थाने च विन्यसेत् त्वं माले सर्वदेवानां
सर्वसिद्धिप्रदा मता तेन सत्येन मे सिद्धिं देहि मातर्नमोऽ
स्तु ते इत्यनया परिपूज्या गोपयेद्यत्नतो यती मालाम

तेच पशुभावेन प्रकल्पयेत् प्रकाशेनैकार्य्यहानिः रिम
स्केतेत्र विदिभिः अंगुष्ठतर्जनीभ्यां वजप्याच्छतगुणं भ
वेत् तर्जन्यंगुष्ठयोगेन शत्रुच्चाटनकारकः अंगुष्ठमध्य
मायोगात्मंत्रसिद्धिः सुनिश्चिता अंगुष्ठानामिकायोगादु
च्चाटोतत्स्मादनेमते अंगुष्ठाकनिष्ठायोगेन शत्रुणां नाशनं मतं
इतितेकथितं विद्वन्मालायाः परिनिर्णयः शक्त्याविस
वनेस्नानमन्यथाद्विः सकृन्नथा विसंध्यप्रजपेन्मंत्रं पूजनं
ततःसमं भवेत् एकदावा भवेत्पूजानजपेत्पूजनं विना
प्रातःकालेऽथवापूजाजपांते वायजेद्दिवा प्रातःकाल स
मारभ्य जपेन्मध्यान्दिनावधि पशुभावेन्मध्यान्दिनावधि
पशुभावेस्थितामंत्राः केवलावर्णरूपिणः सौषुम्नध्व
न्विरिताः प्रभुत्वं प्राप्नुवंतिते मंत्राक्षराणि चिच्छक्तौ प्रोक्ता
नि परिभावयेत् तामेव परमव्योम्नि परमास्ततृंहिताः
दर्शयेत्तात्मसम्भारं पूजाहोमादिभिर्विना मनःसंहृत्य
विषयान्मंत्रार्थगतमानसः नद्रुतं नविलंबं च जपेन्मौक्ति
कपंक्तिवत् जपः स्यादक्षराहाद्विर्मानसोपांशुवाचिकैः
धियायदक्षरश्रेणीं वर्णस्वरपदात्मिकां उच्चरेदर्थमुद्दि
श्यमानसः सजपः स्मृतः जिह्वोष्ठौ चालयेत्किंचिद्देव
तागतमानसः किंचिच्छ्रवणयोग्यः स्यादुपांशुः सजपः
स्मृतः मंत्रमुच्चारयेद्वाचा वाचिकः सजपः स्मृतः मानसा
दित्रिभिर्भेदैः कथितं जपलक्षणं मानसः सिद्धिकामाना
मुपांशुः पुष्टिमिच्छतां वाचिकामारणे शस्तः कथितं ज

पल्लवाणं एवं जपं तु रात्रौ कृत्वा तेजोरूपं समर्पयेत् देवस्य
दक्षिणे हस्ते कुशपुष्पार्घ्यवारिभिः सजपं तद्धि भाव्येव
प्राणायामत्रयं चरेत् जपस्यादावसाने त्रितयं त्रितयं च
रेत् न न्यूनेनाधिकं वापि जपं कुर्य्याद्दिने दिने यदि कुर्य्या
त्प्रमादान्नतदानेष्टमवाप्नुयात् न्यूने न्यूनाङ्गदोषः स्या
दधिके वाधिकाङ्गकं यथाविधिकृतानीह फलन्ति ताम
पतनः जपान्ते प्रत्यहं मंत्री होममेवं तद्दशांशतः तर्पणं
मेकमित्येवं तद्दशांशतो मुने प्रत्यहं भोजयेद्विप्रान्
न्यूनाधिकप्रशान्तये विप्रभोजनमात्रेण व्यङ्गं साङ्गं भवे
द्ध्रुवं गोषु सुश्रूषणं कुर्य्याद्देवताप्रायशःप्रदः गोषु
पिप्रियमाणास्तु गोपालोऽयं प्रसीदति कर्म्मान्ते संस्मरेत्
कृष्णं ततः करणशुद्धये नामसंकीर्त्तनं विष्णोः सर्व्वविघ्न
निकृन्तनं अथवा लनपूर्णञ्च होमादिकृत्समाचरेत् स
पूर्ण्णं यो प्रतिज्ञायां तर्पणादि तथाचरेत् विष्णोर्निवेदि
तान्नेन यष्टव्यो भुञ्जेत् तत्क्षत्सयन् तदन्नाद्देवताय स्यात्तदत्रः
पूरुषो भवेत् शयीत कुशशय्यायां कम्बले वा कुशास
ने एवं प्रतिदिनं कुर्य्याद्यावत् सांगं व्रतं भवेत् होमं चरु
वद्वत्कुर्य्यात्पायसैरथवाम्बुजैः होमाभावे जपं कुर्य्या
द्धोमसंख्याचतुर्गुणं षड्गुणं वाष्टगुणितं यथासंख्यं
द्विजातयः शूद्रस्य विप्रभक्तस्य तत्पत्नीसदृशो जपः हो
मशून्यस्य विप्रस्य यो जपः सवर्त्ततान्त्रियः दशान्तरं मनुव
रं सिद्ध्येद्दशलक्षकं जप्यान्ते तेहोमोऽपि विधिना कर्म्म

चाचरेत् दशान्तरं जपेन्मंत्री सहस्रं दशकं जपेत् ब्रह्म
ह्मसुख्यकल्पोऽयं प्रथमे मूनमुदाहृतं अष्टादशार्णमन्त्र
वरं पंचलक्षं जपेत्ततः कृष्णमेवं समुद्दिष्टमन्यमतं कृ
ल्पसंग्रहात् तर्पणं च ततः कुर्यात्तीर्थोदैश्चन्द्रमिश्रितैः
जले देवं समावाह्य पाद्याद्यैरुदकात्मकैः संपूज्य विधि
नेङ्कृष्णं परिवारसमन्वितं एकैकमंजलितोयं परिवा
रान् प्रतर्पयेत् ततो होमं दशांशेन तर्पयेत्पुरुषोत्त
मे आद्यैर्मंत्रैः समुद्दाद्य श्रीपूर्वं कृष्णमित्यपि तर्पयामा
हमित्युक्त्वा नमोऽन्तं समर्पणो मनुः तर्पणस्य दशांशेन
अभिषेकं तथाचरेत् स्नानशेषान् कृत्वा तदभेदेन
प्रपूजयेत् कृष्णात्मानं स्वमात्मानं ध्यात्वा रश्मिसमन्वि
ते कुम्भे तोयमेकं च सुगन्धिपरिमिश्रितं जलाञ्जलिस
मादाय मूलमुच्चार्य साधकः श्रीकृष्णमभिषिंचामि न
मः स्वमभिषिचेत् अभिषेकदशांशेन ब्राह्मणान् परितर्प
येत् क्षीरखण्डादुभोज्यैश्च वहुमानपुरःसरं विप्रभोजन
मात्रेण व्यंगं सांगं भवेद्ध्रुवं सर्वथा भोजयेद्विप्रान् तेच
कृष्णतत्परतः यत्र भुंक्ते द्विजस्तुष्टस्तत्र भुंक्ते हरिः स्व
यं यत्र भुंक्ते श्रियः कांतस्तत्र भुंक्ते जगत्त्रयं गुरवे दक्षिणा
दद्याद्भोजनाच्छादनादिभिः गुरुसन्तोषमात्रेण मंत्रसि
द्धिर्भवेद्ध्रुवं गुरुमूलमिदं सर्वमित्याहुस्तत्ववेदिनः मि
ष्टान्नं बहुसत्कार्यं भुंजीत बहुभिः सह एवं सिद्धम
नुर्मंत्री साधयेत् सकलेप्सितं एवं नित्यक्रमं कृत्वा नैमि

मो·
तं·
४२

43

त्तिकमथाचरेत् कृते नैमित्तिके विप्र नित्यस्य पूर्णता भ
वेत् अन्यथा नैव सिद्धिः स्यादनुष्ठानशतैरपि मथुरायां
महाक्षेत्रे वसन् कृत्स्नं समर्चयेत् लक्षमात्रं जपेन्मंत्रं मण्ड
लादीक्षितं भवेत् मन्दरस्य महारण्ये सरलद्रुमकानने पु
ष्पैर्वन्यसमुद्भूतैरीज्याशी विजितेन्द्रियः लक्षमात्रं जपन्भ
क्त्या कृत्स्नं पश्यति चक्षुषा वृन्दावनगतो मंत्री द्वाविंशाख्या
नमाश्रितः लक्षं कृत्वा जपेद्रत्या अणिमादिगुणाल्लभेत्
समुद्रगासरित्स्थो कुहिमे निवसन् यती दुग्धाहारो जपे
ल्लक्षं पापकोटिभवोद्भवं नाशयेन्नात्र सन्देहो वाकसिद्धि
चापि विन्दति पर्वताग्रे यजेत् कृत्स्नं शाकमूलफलाशनः
लक्षं तत्रापि संजप्य खेचरीमेलनं भवेत् समुद्रगानदी
तीरे तुलसीकानने वसन् लक्षमात्रं जपात्तत्र कोटिजन्मा
यनाशनं पुण्डरीकदर्वैकैः कृत्स्नं मासमेकं समर्चयेत् ध
र्मार्थकाममोक्षाणां करस्थानि लभेद् ध्रुवं तुलास्थे भास्क
रे पक्षे होमयेद्दशसहस्रकं लक्ष्मीः स्थिरा भवेत्तस्य पुत्रपौ
त्रानुयायिनी श्रीपुष्पैर्जुहुयान्नित्यं वैशाखे मासि तु प्रयः
सर्वपापक्षयकरः सर्वसिद्धिप्रवर्द्धकः देवाः सर्वे नमंस्य
न्ति भक्त्या तं वृषभे श्रीजले तर्पयेत् कृत्स्नं मत्स्यण्डी
वन्दसंयुतैः अष्टोत्तरशतं कृत्वा पूजां तेभ्यक्तितत्परः म
ण्डलाल्लभते सिद्धिं प्रत्यक्षं स्वकवर्त्मना यद्यत्कामयते
मंत्री अनायासाल्लभेत्तत् दुग्धवृक्षाजलैर्नित्यमष्टोत्तर
शतं शतं तर्पयेत्त्रिविलान्कामान् लभेन्मोक्षं च विन्दति

कृशापुष्ट्यैः समभ्यर्च्यमासमात्रेनिरामयः यशसेधर्म्मवृध्ये
वब्रह्मचारीव्रतेस्थितः हयारिकृतसैमेः सृष्टेमाण्डलाहाच्छि
तेभवेत् तथारक्ताम्बमोरणब्रवलाभूतिमाप्नुयात् तथा
हाभ्यासमभ्यर्च्यस्र किंमुक्तिंचविन्दति गोपभक्तिः सदाका
र्य्यागोपुकण्टूपनतथागोपुनित्यप्रसन्नासुगोपालः सप्रसी
दति ब्राह्मणानांतद्विघाणांवैश्यानांशेषजन्मनां स्त्रीणा
चैव महाबाहोनैमित्तिकमिदंस्मृतं पतेषांचैकमात्रेत
कृत्वाकाम्यानिकारयेत् इतिश्रीगौतमीयेचतुर्दशोऽध्या
यः त्रिकालामपर्ह्णेनेवरूपेगोविन्दस्ययथाविधि मंत्रयो
रुभयोः कार्यमेतेषांचतदात्मनः कलायकुसुमश्यामं
नीलेन्दीवरलोचनं वार्षिकंचशिखंमुग्धमासीनंपद्मवि
ष्टरेभगविद्रुमविम्बाभकरपादाधरोद्भवं गुडालकंच
याल्कुन्दमुखेन्दुयहृसंहृतं कुन्देन्दुकाशसंकाशहार
भासितदिङ्मुखं राजकुल्हद्द्याभासनिन्दितानेकमौक्ति
कं महाम्भराशिसंकीर्णसुवर्णानेकभूषणं स्वपृष्ठेपृष
गेगेवधेनुधूलीवयोस्थया गोपगोपीगवांहृद्देवीस
माणं सुविस्मितैः ब्रह्मणाशंकरेणापिप्रेमोत्कंठातस
वीक्षितं पुरन्दरमुखैर्देवैर्मुनिभिः संस्तुतंपरं पवंध्याना
यजेत्कृस्नायजेद्भक्तिभरानतः श्रेष्ठैरिन्द्रियवनाधैरा
हृतिर्वितयाल्लितं क्षीरखण्डाज्यड्ंधंवकदलीनवनीत
कं चोवारम्भाफलेचापिप्रसन्नाल्लप्रियंचयत् जपंचाष्ट
सहस्रंचकृत्वाकृष्णंप्रसादयेत स्तोत्रैर्नानाविधैर्भक्तान

गो· तं· ४४

44

मस्कारप्रदक्षिणैः इत्यनुध्याजलैरष्टशतंमंतर्प्यमंत्रवि
त् आत्मानंतत्कलाम्भोजेष्वलब्धः सन्समर्पयेत् बला
पंणाख्यमनुज्ञाततोन्यस्यहृदंनयेत् पूर्वोक्तिनक्रमेण
यथेष्टमन्यथसमापयेत् हुतशेषंनिशाशीवपकाकी
वनिशानयेत् यएवंमासमात्रेनभक्त्याकुलसमर्पयेत्
पूज्योलोकैः कविर्वाग्मीलक्ष्मीश्चाप्यानुयायिनी पुत्रेमित्रे
स्वसम्बन्धः प्रयान्तेतत्परंपदं मध्याह्नेवासुदेवंतराजम
ण्डलमध्यगं हारावल्यासहस्राकीदीपितेभवनान्तरे क
ल्पवृक्षसमाकीर्णेपुण्यपल्लिनिनादितेपद्मोत्पलादिके
ह्लादैः संकीर्णाभिरलंकृते तस्मिन्सुपुलिनेरम्यच्छाया
यांकस्यच रत्नस्तम्भेरत्नदीपैर्मुक्तादामविभूषिते ना
नाविचित्रांतवितानशतसंकुले तत्पार्श्वरचनेध्यायेत्
पुन्नागकेशरैःसहतथानानाविधैर्हलैःपाटलैश्चम्पका
दिभिः वकुलैःसरलैर्वेणैःकुरुवकैर्वेष्टितेपि सर्व
र्त्तुकसमोपेतैः पुष्पावनतशाखिभिः रत्नसिंहासना
सीनंपुण्डरीकदलेक्षणं हृष्टपुष्टस्कंधपुष्पांगराजन्मगण
मोहनंपुण्डरीकनिभांनाभिपुण्डरीकान्तमव्ययं सभ्रूल
लाटवदनंपुष्पहासंसुलोचनं सुकपोलंसुनासोष्ठेक्षणा
मलंमंगलाश्रयं नीलकुंचितकेशान्तं विचित्राम्बरभूष
णं कम्बुग्रीवंसुविस्तीर्णंकौस्तुभोद्भासिवक्षसं महावली
महोरस्कंमहाभुजचतुष्टयं वलीवलयमध्येनराजद
रशोभिते प्रदक्षिणगतश्रीमन्नाभिविभूषिते समोरु

जानुजंघाभिः स्वस्तिकोत्रिगुणात्मकं तेगरत्नखचि
त्रैतेगपादांगुरीयके अनेकविधरत्नादिपीताम्बरगुणा
हृते स्फुरितोरस्कवक्षेण शोभिते वनमालया रत्नहा
रैस्वसौवर्णैर्ग्रैवेयकविभूषिते केयूरमणिसम्बधराज
भुजचतुष्टये विचित्रकटके ऊर्मनूपुरैः पादशोभिते
नानारत्नमयैर्हैमैरंगुरीयैर्विराजिते अनेतरत्नसंच्छन्न
स्फारत्नकरकुण्डलंसौवर्णैनाभिरुचिर नानाविश्वविचि
त्रितैः लोलद्भ्रमरसंछन्नैः प्रसूनैर्मुकुटोज्वले शंखच
क्रगदापद्मधरं शान्तमुखं विलक्षणे दिव्यलक्षणसम्पन्नं दि
व्यभूषणभूषिते दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेप
नं ललाटहृदये कुक्षौ कंठबाह्वोश्च पार्श्वयोः विराजितो
र्ध्वपुण्ड्रचन्दनेन विभूषिते महीभारभृतानाशातितज्जंघ
नेमुहुर्मुहुः उडुवादिमर्मविवरेर्मत्रयंते मुहुर्मुहुः
नेषानिपातनार्थैव धर्मार्थिनी तिषु क्तिभिः एवंमध्या
ह्नसंध्याकाले ध्यायनजगद्गुरुं आवाससविधिवद्भ
क्त्यापूजयन्नुपचारकैः अंगं पूर्ववद् दृष्टं पूरयादिशपू
जयेत् रुक्मिणीसत्यभामांच कालिंदीव सुलक्षणा ना
ग्नजीतिजाम्बवतीमित्रविन्दांसपीलिका इत्यष्टशक्ती
र्देवस्यपूज्याः कृष्णस्यवल्लभाः आग्नेयां सुदर्शनचक्रं नै
र्ऋत्येवजलोद्भवं वायव्येचगदांदिव्यां ईशाने पद्मसुज्वलं
ततो दलाग्रे वामेच वसुदेवं च देवकी नन्दगोपं यशो
दांच पूरयादितश्च पूजयेत् पाद्यैरर्घ्यैस्तथापुष्पैःधूपै

गो॰
तं॰
४५
45

दिद्दलतोऽर्च्चयेत् बलभद्रं सुभद्रां वरोहिणीं च तथोत्तरे
सुदानेच तथा दानं वसुदामेच किंकिणीं देवस्य वामपा
र्श्वेतु पूजयेद् गुरुपादुकाः परमे च गुरुं तत्र परापरगुरुं त
था पादुकां नमस्कृत्य पूर्व्वसिद्धं तथा यजेत् एवं गणप
तिं यष्ट्वा तद्बहिः परिपूजयेत् इन्द्रादिलोकपालांश्च तत्त
दिक्षु स्वमंत्रतः कुमुदं कुमुदाख्यं च पुण्डरीकं च वामनं
शंकुकर्ण्णं सर्व्वनेत्रं सुमुखं सुप्रतिष्ठितं इति गणवर्गमेता
न् पूर्व्वादिदलतोऽर्च्चयेत् उमेशानयोर्म्मध्ये विष्वक्से
नं समर्च्चयेत् संपूज्यैवं हरिं भक्त्या नैवेद्यं च निवेदयेत् पा
यसं शर्करापूपं खण्डं च कदलीफलं सितोपदंशमंत्रच
स्वर्णपात्रे निवेदयेत् अथवा रौप्यपात्रे वा ताम्रपात्रेऽथवा
पुनः अभावात् पद्मपत्रे वा अन्यथा नरकं व्रजेत् सुवर्ण्णव
सकेवाथ रौप्यं वा विधिना ततः सशर्करं पक्कदुग्धं अत्र
व्यंजनं पायसं नानाविधोपहाराणि गोविन्दाय निवेदयेत्
राजोपचारं दत्वा तत्स्तवानतो विसर्ज्जयेत् य एवं विनय
देवं गोपालं विगतस्पृहः राजानः किंकराः सर्व्वे समा
स्याः सपरिच्छदाः राजपुत्राश्च पत्न्यश्च सर्व्वे तस्यानुवर्त्तिनः
इह भुक्त्वा वरान् भोगानन्ते विष्णोः पदं व्रजेत् अष्टोत्तर
शतं होमं कुर्य्यात्तत्संख्यया ततः होमं तर्प्पणयोर्म्मंत्री
साधयेदखिलानपि प्रातर्होमं प्रकुर्व्वीत तथा मध्य
न्दिनेऽथवा रात्रिहोमं च मध्याह्नेन कुर्य्यादेवं वि
धिः स्मृतः ॥

तृतीयकालपूजायामस्तिकालविकल्पना सायाह्ने निशि
वेत्यत्रवदन्त्येके विपश्चितः अष्टादशार्णे सायाह्ने शौरे च
दशावर्णके उभयोमुभयेनैव वदन्ति ब्रह्मवादिनः सायाह्ने
द्वारवत्यान्तु विचित्रकोद्यान मध्यगः सौगन्धिकोत्पलमती
दीर्घिकाशतवेष्टिते नन्दनोद्यानमध्यन्तु कदम्बवनमध्य
गे ज्वलद्रत्नमयैःस्तम्भैः सरत्नवीथिकान्विते नानारत्न
मयोल्लासिप्राचीरद्वारशोभिते महारत्नमये गेहे मुनि
भिःपरिवेष्टिते नारदाद्यैर्मुनिवरैः शौनकैः पिप्पलादि
भिः सनकादिब्रह्मपुत्रैः परीतं तत्त्वनिर्णये नारदपर्वत
तैस्त्वजिष्णुनिशठोद्धवदारुकैः विष्वक्सेनेन च शैलेयेनकृ
पादृष्टिविलसिते तेभ्यो मुनिभ्यः स्वधाम दिशन्तं परमत
रं चन्द्रकोटिप्रतीकाशं विश्वावकाशदीपितं नानारत्न
गणाकीर्णमहामुकुटभूषितं अनेकरत्नसंपर्कलस
न्मकरकुण्डलं भावहारावलीराजलसत्कौस्तुभवक्षसं
नानारत्नगणाकीर्णकेयूरवलयाष्टकं विद्युद्वत्कनका
भासपीताम्बरसुगाहृतं वन्धुरोदारजठरं गम्भीरनाभिपं
कजं उद्गगचरणाम्भोजलसत्स्वर्णाङ्गुरीयकं प्रदीप्तरत्न
कटकतुलाकोटिद्वयान्वितं शाशाङ्ककाधरसुठमारकप
दर्पकं जेशं खचक्रगदापद्मधारिणं वनमालिनं शुद्धज्ञा
नस्वभावत्वात्सम्पृक्तं परात्परं अज्ञाननाशकाद्दृन
नववारिजसन्निभं सूर्यकोटिप्रतीकाशमविद्याध्वान्त
नाशनात् इत्येवं परमात्मानं ध्यायन्ति ब्रह्मवादिनः एवं

ध्यात्वा मध्यमार्ग्गविधानेन प्रपूजयेत् सहस्रैकं जपेन्मंत्रं
होमादृशांशतर्पणे रजताराजिते पात्रे स्वर्णेरेकुगंधं निवेदये
त् सर्वोपचारान्दत्वाथ नमस्कृत्य विसर्जयेत् गृहस्थानां
वनस्थानां मासिकाहृदयाम्बुजे ध्यात्वा संपूज्य मुनिभिर्मान
सैरुपचारकैः विविक्तो गृहमेधी च मुनिभिः सह पूजयेत्
वासुदेवादिभिरपि निर्वाणपदमाप्नुयात् साधाहं वा सुदे
वं व पूजयेद्विधिनानरः देवाः सर्वे नमस्यन्ति किं पुनर्नरम
र्कटाः संसारसागरे घोरे निषमे नक्रसंयुते संतीर्थ्य विष
यान्भुक्त्वा तानीनि पदमाप्नुयात् दुर्वासनोपरिमज्य को
टिजन्मसमुद्भवं एकेन जन्मना शुक्रियाति केवल्यनिर्मि
तेत द्विलोः परमे पदे सदा पश्यति सूरयः गोत्रो चेन्मन्मथा
क्रांते मानसे देवकीसुते रासगोष्ठीपरिश्रान्ते गोपीम
ण्डलमध्यगे वृन्दावनगते ध्यायेत् छायायां कल्पशा
खिनः सुस्थिते वेणुगायते वनमालापरीवृते पीताम्ब
रधरे श्यामे गोपिकासंपरिवेष्टिते देवासुरैः सगन्धर्वै
रप्सरोभिश्च सेविते यक्षैर्विद्याधरगणैर्विहंगैर्भूविय
दगतैः ब्रह्मर्षिभिर्देवर्षिभिः स्तूयमानैस्तु विस्मितैः
नानाविधैरप्सरोभिर्वीक्ष्यमाणैस्तु विस्मितैः लेलिह्यमा
नगन्धर्वैर्देवस्त्रीशतकोटिभिः इन्दीवरनिभे रत्ने सुन्द
रे तु वराननं सफुल्लपद्मवदने पद्मपत्रनिभेक्षणे प
द्मनाभि पाणिपादं पद्मनाभिनिभाधरे शरणं सर्वभू
तानां गोपिकाजनवल्लभम् ॥ ॥

क्वचिद्भृंगपरिमिलनपंकजोपरिसंस्थितं कल्पितानेक
देहेननारीगणशतकोटिभिः वेष्टितं रममाणं च गायंतं
दिव्यमूर्च्छनैः द्वाभ्यां द्वाभ्यां वल्लभाभ्यां मध्ये मध्ये विरा
जितं यथा मरकतस्तम्भं स्वर्णेनाभिवेष्टितं क्वचिद्गो
पांगनावस्त्रहारिणं हेलया लिखितं क्वचिद्धसंतं हासंतं स्त्री
हस्तसुपहासकैः निर्मितं देवनिकरैरर्चितं पुष्पवृष्टिभिः
देवस्त्रीभिर्वीज्यमानं कामोत्कंठिकचेष्टितम् एवं ध्यात्वा
मधुरिपुं यजेत् संशितव्रतः मिथुनैः षोडशांकैः केशवादि
भिराहृतं महौषधिभिस्तथा वीतरागीभिरपि सर्वतः ए
वमभ्यर्च्य विधिना कोशपे वा राजतो विते पात्रेऽर्घ्यं निवे
दयेत् मिथुनेभ्यस्तथा वेयेत् जप्त्वा स्तुत्वा नमस्कृत्य महत्
पद्मे ते विसर्जयेत् एवमभ्यर्च्य जगतां पतिं सुडमनाय
तिः धर्मार्थकाममोक्षाणां दायादो भवति ध्रुवं विशेषे
दाधिपो भूयात् सप्ताह्निभिश्चरल्दः त्रिये राजवर्षे स्व
वैश्यो धनसमृद्धिमान् शूद्रः सुखानि सर्वाणि भुक्त्वा
ते परं व्रजेत् एवं ते कथितं विप्र संसारभयनाशनं श्रेष्ठं
नं त्रिविधा यातमूलविषानिकृंतनं इति श्रीगौतमीये
पंचदशोऽध्यायः गौतम उवाच ब्रूहि मे वालकृष्णस्य त्वं
तव सार्वज्ञकारणं ब्रह्मणा यत्पुरा प्रोक्तं सेवया तपसो
हितः यत्प्रसादात्त्वं निरोष्टं त्रैलोक्यविदितं नतं यथा
क्रमं कथय मे सर्वमेव समाहितः सुश्रूषामेव न वती
गोपालस्यार्हंते प्रति नारद उवाच वाल्पते कथयामाद्य

गौ· ते· ४१

देवस्यपरमाद्भुतं गोपनीयंननेकिंचितंहिवेदविदांव
र तपसाकल्मषमनाःकृत्स्नोभक्तोऽस्तिनिश्चयात् तारः
प्रजापतिःशक्रोमायाचविन्दुरेव एतन्मत्रवरंविद्धिरह
स्यपरमाद्भुतं महाचमत्कारकरंरिपुक्षोभणकारकं
चतुर्वर्गफलंचास्यजपमात्रेणसिध्यति गोपालस्यापि
येमंत्रावर्तन्तेऽत्रैवतंत्रके सदोषितमनेनैवफलप्रदम
वेष्यतां चूडामणिरयंप्रोक्तोदेवस्याशिश्वरूपिणः ब्रह्म
मुनिःसमाख्यातोगायत्रीछन्दउच्यते देवताकथितःकृ
ष्णःसर्वकामफलप्रदःसमाख्यातोच्चारणेऽस्यमध्यमस्वर
ईरितः नेत्राथितर्कसूर्येन्दुःकालवर्णैर्विभेदितैः पंचा
गानिमतोःकृत्वाध्यानंकुर्यात्समाहितः मथुरायांपुरे
ध्यायेत्केसस्यान्तःप्राजिरे सूतिकागारहम्मध्यस्थंजात
मात्रंजगत्पतिं सिद्धचारणगन्धर्वदेवदानवकिन्नरैः
यतरात्तसवेतालैः खेचरैर्दिकचरैरपिविद्याधरीभि
र्देवीभिः किन्नरीभिःसमंततः ब्राह्मणातनयैःसार्द्धंवी
क्ष्यमाणंमुदान्वितैः इन्द्रादिभिश्चदिकपालैर्लसत्कु
सुमवर्षिणैः चतुर्भूजंशंखचक्रगदाशार्ङ्गधरंहरिं दक्ष
ऊर्ध्वेरथचक्रंगदांचतदधःकरे वामस्योर्ध्वेशार्ङ्गधनुःशं
खंचतदधःकरे नवीनजलदश्यामंपीतकौषेयवाससं
विलसत्कुण्डलाभोगभास्वरेनिजमूर्द्धनि विहिताशे
षसद्रत्नशोभिस्वर्णकिरीटकं सुगन्धिपारिजातेनशो
भिताशेषकुन्तलं ललाटतटविन्यस्तकस्तूरीतिलको

ज्ज्वलं अष्टमीचन्द्रशकलभालभालतलोज्ज्वलं उत्फु
ल्लपुण्डरीकश्रीनयनद्वयभासिते मनोभवधनुःकल्प
विल्लीचापविराजितं तिलप्रसूनविजयिनासावंशवि
भूषिते पराधचन्द्रसंकाशमुखचन्द्रविराजितं दाडि
मीवीजकुन्दाभदंतपंक्तिमनोहरं पक्वविम्बफलोद्भासि
दंतवासोज्ज्वलं विभुं जाम्बूनदानेकरत्नस्फुरन्मकरकु
ण्डलं महामरकतस्तम्भभासमानभुजोत्करं रत्नचामी
करभोगिरंगदैवलयैर्युतं कम्बुग्रीवं महोरस्कं मुक्ताहा
रविराजितं श्रीवत्सलांछनभ्राजत्कौस्तुभोज्ज्वलव
क्षसं रत्नवैडूर्यघटितकिंकिणीजालमालिकं पट्ट
सूत्रेण सन्नद्धमध्यदेशोपशोभितं रत्नमंजीरयुगलमं
जुश्रीपादपल्लवं देवकावसुदेवनन्दनेन विधिनातथा
विदित्वनिष्टनालोत्रमुखेरणपुटांजलिं मेरुशृंगप्रती
काशंगरुडोपरिसंस्थितं एवंध्यात्वापरात्मानंगुरुमा
त्मानमेवच एकीभावेनसंभाव्यततःपूजनमारभेत्
कर्पूरमाजितालोलसितचन्दनचर्चिते शालिविहेव
कीपुत्रयंवेशोभनेरखया शलाकयाविद्रुमयातथा
वापिवहेमया किंजल्करूपकंहस्तेनतालेख्यचतुर्दलं
ततोहस्तेचाष्टदलेलिखेद्दशदलेततः समरेखचतु
ष्कोणचतुर्द्वारसुशोभितं वीजशोभिचतुर्द्वारेचतुष्को
णविराजितं मध्यसंपूज्यदेवेशंपूजयेच्चचतुर्दले पे
शमामीश्वरंदेवमाग्नेय्यांचपितामहं नैर्ऋत्यांवसुदेवं

गौ॰
तं॰
१४८

148

वायव्यामम्बिकामपि तथा चाष्टसु पत्रेषु पूजयेद्देववल्ल-
भाः रक्ताम्बरधराः सौम्याः कराम्बुजधृताम्बुजाः सर्वालं-
करणोद्दीप्तालसद्यौवनविभ्रमाः श्रीमद्देवमुखाम्भो-
जन्यस्तनेत्रमधुव्रताः ततो दशदले पूज्या लोकपाला
स्ततो वहिः गरुडं पश्चिमे द्वारे जयं पूर्वे प्रपूजयेत् वि-
जयं दक्षिणे नन्दनारदं च तथोत्तरे बद्धांजलिकराः सर्वे
सस्तोत्रमुखराश्चापि विलसद्वनमालाश्च पीतकौषेय
वाससः ततः शंखं च चक्रं च गदां कौमोदकीमपि शार्ङ्ग
धेनुं च संपूज्य तद्बाह्ये पूजयेदपि ऐरावतादीनभ्यर्च्य
गणानष्टौ ततो वहिः कृते लक्षं जपेन्मंत्रं त्रेतायां द्विगु-
णं तथा त्रिलक्षं द्वापरे जप्याच्चतुर्लक्षं कलौ जपेत् प्र-
योगान् यथा कुर्वीत साधकः सिद्धिलालसः लक्ष्मीप्रसू-
नैर्जुहुयाच्छ्रियमिच्छन्ननिन्दितां आज्येनान्नेन जुहुयाद-
न्नस्य समृद्धये आरण्यकुसुमैर्विप्रान् जातीभिः पृथि-
वीपतीन् प्रसूनैरसितैर्वैश्यान् शूद्रान्नीलोत्पलैरपि
वशीकुर्ल्लवर्णैः सर्वान् पंकजैर्वनिताजनान् गोशाला-
स्वकृतो होमः पायसेन ससर्पिषा गवां शान्तिकरो मतो
मो विद्वान् गोकुलप्रियः शिखंडेशधरं देवं किंकिणी-
जालशोभितं स्मृत्वा प्रतर्पयेन्मंत्री दुग्धबुद्ध्या शुभैर्ज-
लैः धनधान्यांशुकादीनि प्रीतस्तस्मै ददाति सः पिण्ड-
मूलेन वीतं दहनपुरयुगे कोणराजत् षडर्णं कृष्णात्
पद्मे दशार्णं स्फुरितदशदले कामवीजेन वीतं पद्मं कि-

ञ्जल्कसंस्थं स्वरविकृतिदलप्रोल्लसत्षोडशार्णं किञ्ज
ल्कव्यंजनाढ्यं विकृतिदलयुगे सुर्पितानष्टवर्णं पाशा
ङ्कुशाभ्यामावीतं लोणीपुरयुगान्वितं अष्टान्तरेण संवी
तं यंत्रं गोविन्ददेवतं धर्मार्थकामफलदं सर्वरत्नाकरं
स्मृतं पत्रांतकोथरासंस्थामनुविन्दुविभूषितः पिण्ड
वीजमिदं प्रोक्तं सर्वसिद्धिकरं परं चतुर्लक्षं जपेदेतत्तद्
शांशं हुनेत्ततः तर्पयेत्तद्दशांशं च दशांशं चाभिषेचये
त् ब्राह्मणान्भोजयेद्वापि दशांशमिति च क्रमात् गणे
शं भास्करं रुद्रं गौरीं च परिपूजयेत् विदित्वं यंत्रराजस्य
स्वस्वमंत्रपुरःसरं एतद्द्वारेणमात्रेण त्रिकालज्ञो भवेन्न
रः यद्यपि द्विजोपि सर्वं साधयेन्नात्र संशयः अनेन सह
शो मंत्रो यंत्रं चापि न विद्यते केवलं प्रेमभावेन कश्चि
तेतद्वसमश्नुत इति श्रीगौतमीये षोडशोऽध्यायः १६
अथ प्रयोगान्वक्ष्यामि मंत्रयोरुभयोः समान् यान्कृत्वा
साधकवरो लोकद्वयसुपूजितः तदात्मकारिमंत्रान्
वेवक्ष्यामि च क्वचित्क्वचित् वन्दे तं देवकीपुत्रं सद्यो
जाताम्बुजप्रभं शंखचक्रगदापद्मधारिणं वनमालिकं
एवं ध्यात्वा मनुवरं लक्षं ब्राह्मे मुहूर्त्तके जप्त्वा मेधां परां
प्राप्य कवीनामग्रणीर्भवेत् अथवा स्फटिकाभासं हि
भुजे लेखपुस्तकं धारिणं तं विचिन्त्याथ लक्षं ब्राह्मे मुहू
र्त्तके जप्त्वा मंत्रं त्रिकालज्ञो बृहस्पतिसमो भवेत् अथवै
तत्समो मंत्रः प्रोच्यते शृणु तत्त्वतः श्रीमत्पदं तथा बो

गो॰
तं॰
४९

49

त्कामकूल्दचरणेनतः सदेतिशरणमहंप्रपद्येस्वाहया
युतः अष्टामलेकोमलेबालेक्लींऽन्ते मात्रकके द्विभुजं
स्तनपातांरविन्नन्दस्तिथयोभवेत् लक्षमात्रजपेद्देवि
समानंलभतेफलं कामबीजाद्यमंत्रोऽयं किंनसिध्यति
भूतले उपसंहृतदिव्यांगेसुरोवमातरंकगे चलद्दृगो
श्ररणेबालेध्यानाद्धास्यस्वरूपके जप्त्वामनुवरंविद्वा
नसर्वशास्त्रार्थविद्भवेत् सर्ववेदार्थकुशलोज्ञानवान्
भवतिभुवं नन्दागनेपर्य्यटंत्यभूलीनिचयधूसरेप्रदी
प्तमणिगणोद्दीप्तेयशोदालोकनीनत्सके एवंध्यात्वा
मनुवरंजपेन्नियममास्थितः लक्षेकजपनादस्यकिंन
साध्यतिभूतले प्रातःप्रातःपिबेत्तोयमष्टोत्तरशतेज
पन् अनेनमूकोऽडुष्टार्थोजडःपाषाणवन्नथा अनेनत
जलपानेनसाक्षाद्वाक्पतिसन्निभः जायतेनात्रसंदे
हः सत्यंसत्यंनचान्यथा पञ्चाग्निःलिप्यशाकटरुदंते
शाकृतेतथा लक्षंजप्यादितिध्यात्वाश्रापद्भ्यामुच्यतेभु
वं शत्रुभ्योनभयंतस्यराजनोदस्युतोऽपिवा नतस्यवि
द्यतेभीतिःकदाचिदपिसुव्रत अथापरंप्रवक्ष्यामिरह
स्यंसुरपूजिते यज्ज्ञात्वासाधकवरःप्रयोगफलमा
प्नुयात् ब्रह्माणंसोमसंयुक्तंमूर्द्धिण्यस्वरविभूषितं
विन्दुनादसमाक्रांतंकल्पराजेसमुद्धरेत् पवनंवीतिहो
त्रस्थंमहामायास्वरान्वितं विन्दुनादसमाक्रांतंद्वितीय
बीजमुद्धरेत् वीतेरेफसमायुक्तंचतुर्थस्वरभूषितं ना

दविन्दुसमायुक्तेतृतीयेवीजमुद्धरेत् धान्तेशाम्बुस
मायुक्तंइन्दुविन्दुसमन्विते दौर्गंवीजमितिख्यातंस
मस्तापन्निवारणं शम्भोःपदंवह्नियुतेमायाविन्दुसम
न्विते अशेषजगतोवीजंमहामायेतिविश्रुतं अनया
योजितोमंत्रीअसाध्यमपिसाधयेत् वान्तेवह्निसमा
युक्तेचतुर्थस्वरभूषिते श्रियोवीजमितिप्रोक्तंलक्ष्णांस
र्वसत्वप्रदं विरिंवीलृसमायुक्तंचतुर्थस्वरभूषिते ना
दविन्दुकलाक्रान्तेवीजं त्रैलोक्यमोहनं प्रोक्तंसान्ता
न्तेतन्नषष्ठस्वरसमन्विते नादविन्दुकलायुक्तंकूर्च
वीजमितिस्मृते एतेषांवीजवर्णानांज्ञात्वाकर्मा
णिमंत्रवित् गुरुतःशास्त्रतःसम्यक् सर्वकर्माणिसा
धयेत् अन्यथानैवसिद्धिःस्यान्मंत्रःकल्पशतैरपि मे
रुस्थंतुर्दशस्वरः अधोवह्निसमन्वितः नृसिंहवीज
मित्युक्तंभूतापस्मारनाशने समाहितमनाभूत्वापद्मा
तैःकृतमालया अयुतैकंजपेन्मंत्रंब्रह्मचारिव्रतेरतः
अल्पयासेनकामाः स्युर्दारिद्र्यंनजायते सर्वमनो
रथास्तस्यसिध्यन्तीतिनसंशयः नित्यकर्मरतःकुस
चम्पपुष्पैःसमर्चयेत् वश्याभवंतिसर्वेचब्राह्मणाना
त्रसंशयः गोपालवेशमनसाजातीपुष्पैःसमर्चयेत्
वश्याभवंतिराजानोनात्रकार्याविचारणा तमेवरक्त
पुष्पैस्तुवैश्यावश्याभवंतिहि नीलोत्पलैश्चशूद्राः
स्वर्मीसहृसंसमर्चयेत् जुहुयादर्ककुसुमैर्मिश्रिते

क्लिन्नतण्डुलैः मंत्रेणाष्टसहस्रं तु जप्त्वा भस्मथुरेद्य
तिः ललाटे विधृते तस्य सर्वे वशगा भवन्ति हि अनेनैव
शरीरेण राजानो वशगा मिथः स्त्रियो वशगा भवन्ति स
पुत्रामात्याश्च सर्वथा विवाहार्थी जपेन्मंत्रं मासमष्ट
सहस्रकं रासमण्डलमध्यस्थकृष्णध्यानावृते स्थितः
विवाहयेदुत्तमां तारुण्यां सर्वकुलोज्ज्वलां पुत्रे मरणत
तेति हि जनशार्थितो हरिः हतपुत्रं समाहृत्य ददौ य
स्मै विधिं चिन्तयेत् पुत्रकामो लभेत्पुत्रं मासेनैकेन सुन्द
रं दीर्घायुषं प्रतिष्ठितं बलवीर्यसमन्वितं कृष्णपुष्पैः स
माराध्य कृष्णं ध्यायेद्वै कन्यका मासद्वयं तथा मंत्रं जपे
द्दशसहस्रकं मनोरथपतिं लब्ध्वा दीर्घकालं च क्रीड
ति अंजनं कुसुमं वस्त्रं ताम्बूलं चन्दनं तथा अन्यान्या
न्युपभोगानि स्पृष्ट्वा मंत्रेण शतं जपेत् दीयते यस्य यस्या
भिसौः विवादा सर्वे वशी स्त्रियो वशगा अनेनैव भवन्ति
मुनिसत्तम पुरुषं वशयेन्नारी अनेनैव विधानतः
अन्नाद्यकामः श्रीपुष्पैः सिततण्डुलमिश्रितैः अष्टोत्तर
सहस्रं तु जुहुयादन्नवान् भवेत् विश्वरूपपरं ध्यात्वा
शतमष्टोत्तरं जपेत् समाहितमनाः श्रीमान् यशस्वी
कीर्त्तिमान् भवेत् प्रेतभूतपिशाचाश्च स्कन्दादिग्रहपी
डितैः पूतनास्तनपानं ध्यात्वा मंत्रं शतं जपेत् प्रणश्य
न्ति ग्रहा दुष्टाः पलायन्ते इतस्ततः सर्पमण्डलदष्टाश्च मूषि
कायैश्च दंशितान् कृष्णं कालीयदमनं चिन्तयित्वा जपेन्नरः

तर्ज्जयंतं विषं घोरं हुंकारेण विनाशयेत् अत्राण्यमो
मंत्रकूर्चबीजयुग्मेन तत्त्वतः कालीयस्य फणामध्ये
दिव्यं नृत्यं करोति च नमामि देवकीपुत्रं नृत्यराजानमच्
युतं ज्वरार्तोऽभ्यर्चयेन्मंत्री जपेदष्टशतं तथा ज्वरेण
संतप्तं कृष्णं बलप्रद्युम्नसंयुतं दहंतं बाणनगरीं ग
रुडोपरिसंस्थितं निजज्वरेण संपिष्टं ध्यात्वा नाशय
ति क्षणात् शीतलाकामलादीनि तथा वातार्थकोद्भवा
न् प्लीहगुल्मयकृत्कुष्ठापस्मारभवं तथा नाशयेन्ना
त्र संदेहो दृष्टिमात्रेण मंत्रिकः गोपालं यष्टिपाशं च
धेनुमादाय संस्थितं ध्यात्वा कृष्णं जपेन्मंत्रं पशुमान्
सततमामतः राज्ञः पुरोधा भवितुमिति यस्य मतिर्भवेत्
मधुसिक्तैः सितैः पुष्पैर्हुत्वा तन्मण्डलाल्लभेत् मंहैश्व
र्यमथ प्राप्य विख्यातो भवेद्ध्रुवं गोवर्द्धनधरं कृ
ष्णं ध्यात्वा मंत्रं जपेन्नरः वातवर्षादिभिर्घोरैर्भये सम
पस्थिते भयमाशु विनश्येत नात्र कार्या विचारणा
वृंदावनगतं कृष्णं वृष्टिकामो विचिंतयन् जपेदष्ट
सहस्रं तु वृष्टिमाप्नोत्यसंशयं एवं च मनसा ध्यात्वा वृष्टि
वर्षापचारहेत् एवं जलाशये ध्यात्वा जपेदष्टसहस्र
कं वृष्टिर्भवत्यकालेऽपि महती नात्र संशयः गायंतं
वेणुना कृष्णं गानकामो विचिंतयन् आज्यमष्टशतं
हुत्वा किन्नरैः सह गीयते जयकामो जपेद्यस्तु सहस्रक
लकडुमे संतप्तं देवताभिस्तु गरुडारूढमच्युतं ध्या

गो॰
तं॰
५८

त्वा रक्तकरवीरसमिद्भिर्जुहुयाद्वशी अष्टोत्तरसहस्रं तु
पत्नात्पराजितो रिपुः राजादिभयमापन्ने संशये दुर्गसं
सदि हुत्वा दशसहस्रं तु तत्तल्लक्षणान्नाशयेद्ध्रुवं नीलो
त्पलादिभिः पुष्पैरष्टोत्तरसहस्रकं शोवादिनिधिसंयु
तेहारकामध्यगं हरिं ध्यात्वा तन्मण्डलं हुत्वाभिर्हुत्वा प्रां
तिकमाहरेत् कदम्बमूले गायन्तं गोपालं वनमालिनं
कदम्बपुष्पैः संस्पृष्टं चिन्तयित्वा जनार्दनं अपामार्गश
मेर्हुत्वा जपेदष्टसहस्रकं सर्वान्कामान्वशीकृत्य श्री
श्रुविज्ञो भवत्यपि राजद्वारे सभायां च व्यवहारे च मंत्रवि
त् मंत्रमष्टशतं जप्त्वा प्रथमं वाक्यमुच्चरेत् अनेनैव वि
धानेन सर्वत्र विजयी भवेत् मोक्षकामो जपेद्यत्नपुण्ड
रीकाक्षमव्ययं सनकाद्यैः स्तुतं कृष्णं शुक्लाम्बरधरं परा
शरवेचक्रधरं ध्यात्वा मंत्रं लक्षं जपेन्नरः ताराभ्यां पुदिने
कृत्वा विधिवत्स्थानमाश्रितः चक्राब्जमण्डले कृष्णं पू
जयन्भक्तिमावहन् संसारसागरात्तस्मान्मुच्यते नात्र
संशयः यदृच्छेद्ब्राह्मणो मंत्री वशीकर्तुं जगत्त्रयं वसेत्स
तोहरैः पुष्पैर्वेणुं गायन्तमच्युतं ध्यात्वा संपूज्य विधिवल्ल
क्षमेकं सहोमकं जप्त्वा समस्तलोकानां प्रियो भवति ना
न्यथा दैवोपमस्त्वं भुक्त्वा याति विस्तं तनुं द्विज अर्द्धये
मानमाहकं संसहस्रं प्रत्यहं जपेत् वत्सराल्लभते मो
क्षयं तत्त्वावाननिवर्तते वर्णिनां च गृहस्थानां नामाश्रि
तानामप्ययं विधिः मेधाकामो हुनेद्गोपालाशोकसमि

श्रितैः समिद्भिः पूर्ववज्ज्ञात्वा मेधा स्यादति मानुषी वा व
त्सिञ्चेल्लमेद्वाचं ब्राह्मे जप्त्वा मुहूर्तके शतं शतं वत्सरेणा
मेवाग्मी चापि सुधीर्भवेत् शत्रूणां जयकामस्तु पारिजात
हरं हरिं गरुडारोहणं ध्यात्वा जिताशेषदिवौकसं समि
द्भिश्चापि जुहुयात् करवीरसमुद्भवैः लतेजप्त्वानत्याल
तेजुहुयान्मन्त्रवित्तमः जित्वा शत्रुगणानेतान्नाक्रान्ता
स्मृत्यथाविधि प्रतिष्ठां कारयेदयन्तु भगवन्तं विचिन्त्य व
शं वपद्मनिधियुक्तं वसन्तं द्वारकापुरीं ध्यात्वा तिलाज्य
करणान् जुहुयात् सितनण्डुलान् अष्टोत्तरसहस्रं वै
प्रतिष्ठां लभते ध्रुवं सर्वांल्लोकान्वशीकर्तुं कामयन्
पंकजासने कदम्बमालया नित्यं भगवन्तमलंकृतं स
नकाद्यैः प्रार्थ्यमानं योगिभिर्गोपवेशकं विचित्रपुष्प
मालाभिर्भूषितं वनमालया कदम्बमूले गायन्तं चिन्त
येत्सर्वनायकं समिद्भिः पुष्पमार्गैरष्टोत्तरसहस्रकं
मध्वाज्ययुक्तं जुहुयात् सर्वलोकवशी भवेत् सुसूत्रमि
भगवन्तं पुण्डरीकदलेक्षणं सनकाद्यैश्चिन्त्यमानं सिद्धै
रन्यैश्च योगिभिः ब्रह्मेन्द्रशंकरमुख्यैर्गणैश्चापि दिवौक
सां प्रह्लादप्रमुखैर्भक्तैरन्यैश्चापि महात्मभिः हृत्प
द्मकर्णिकान्तर्गतदिव्यसिंहासनोपरि ध्यात्वैवं परमात्मा
नं यशोदानन्दवर्द्धनं पलाशतुलसीपत्रैः सौवर्णकुसु
मैः शुभैः मानसैर्वा यथाशक्त्या प्रार्चयेत्पुरुषोत्तमं आ
त्मानं देवकीपुत्रं लीलाविग्रहधारिणं स्मरेत् यद्यत्कामय

गी· ते मंत्री तन्मदाशोस्मयत्नतः अनेन विधिना सर्वं साधये
ते· त् परमात्मनः योजयेच्च चतुर्थेन विसोक्षेव बुद्धिमान्
५२ तृतीयमष्टमं विद्यादक्षरणा विस्तनासह इति श्रीगीत
52 मीये सप्तदशोऽध्यायः अथापरान्प्रवक्ष्यामि प्रयोगान्
भुविदुर्लभान् यत्कृत्वा मानवः सम्यक् सद्योदेवत्वमृच्छ
मामाध्यं विधयेतं तस्य भुवि स्वर्गे रसातले निशीतशारनिभि
नेभीष्मतापहरे हरिं दृष्ट्वा पीयूषवर्षिण्या कारुण्यात्मनं वि
लोकयन् एवं ध्यात्वा घृतं जापादसाध्यज्वरनाशने मूर्छा
दाहगदास्फोटविषकीटसमुद्भवं नाशयेदाहमत्विराद्
अस्ततोशोशतोहनेन् काशीराजेन प्रहितां कृत्यां तोद्धा
रकापुरीं निजारिणानोच्छित्वा तत्र तत्पुरीं चक्रतेजसा
ददहे तेन हरिं स्मृत्वा जपेद्घृतमादरात् स्वस्वेहाकैः स
मर्पैस्त्रहनेन्द्रोशातथाघृते कृत्याः परेरिताप्लीन्तु नयसे
तिकदाचन डाकिनीभूजना कृत्यायत्नपन्नगरालसाः
अमेवक्रूरसत्वाश्च प्रेयागाजपहोमयः देशादेशान्तरं
याति न समर्था अहिंसिते ध्यात्वा विश्वेश्वरं देवं व्याप्तवि
श्वावकाशके सूर्यकोटिप्रतीकाशे चन्द्रकोटिसुशीतले
एवं ध्यात्वा च मतिमान् लक्षमेकं जपेन्मनुं जुहुयाद्घृतम
क्ताशतवीर्यकरञ्जिकैः हूर्वायसप्राप्नोतिः अकालमृत्यु
नाशाय सत्यमेतत्परं पदं मृत्युंजयं हरिं ध्यात्वा सर्वपा
पैर्विमुच्यते आसीनमाश्रमेदिव्ये वदरीषण्डमण्डि
ते ॥

स्पृशन्हृद्ब्राह्मलाभ्यां चेदाकर्णकलेवरं एवंध्यात्वा
जपेन्मासमष्टोत्तरसहस्रकं समस्तविपदां मंत्री प्रश
मायप्रामायच समता सर्वभूतेषु आसुनिर्वाणदायक
विशीर्षरथमारूढं तर्जयंतं मुहुर्मुहुः धावमानं रिपुग
णं अनुधावनमच्युतं विसृजद्वाणसंघेन नयंतं हृदे
शतः उच्चाटनं भवेत्सद्यो रिपूणां लक्षजापतः हेमयं
तेह कित्वलोपाण्डमध्यस्थितेहरिं ध्यात्वा लक्षमनुव
र्तिनिस्वमेह विनिक्षिप्तं तैलेनेस्वार्थः तदंतेजुहुयात्मे
ग्रीगुलिकागोमयद्रवाः एवंप्रयोगमात्रेणवैरस्यजाय
ते मिथः अन्योन्यकलहैर्नैव देशाद्देशांतरं व्रजेत् विहि
हृलवत्त्रापिकाकवत् पश्चदेन्मही पार्श्वदिशंतेगीता
र्थरथस्थं मधुसूदनं राजमण्डलमध्यस्थं चन्द्रायुतस
मप्रभं ध्यात्वायुतं मनुवर्णं मायया जपेत्सुधीः अने
नजपमात्रेण किं न सिध्यति भूतले स्यान्हृषीकेशं तवे
त्यादिवाज्ञनवाधिकं गायत्रीछन्दो वलितं विश्वात्मा वि
श्वदेवतं सपर्याः पूर्ववत्प्रोक्ता साधयेत्सकलेप्सितं
श्रीवीजाद्येर्जपेन्मंत्री वशी ध्यात्वा च पूर्ववत् लक्षैकज
पमात्रेण कुवेरत्वमोदते अन्नदेवत गोपालवल्लभः म
म्पूर्णं तत्वतः अन्नरूपः रसरूपः तुष्टिरूपपदोपरि
अन्नाधिपतये स्वाहा सोऽयमन्नाधिपो मनुः श्रीवीजाद्यो
मनुः प्रोक्तोऽक्षरत्नसमंडितः आचकांघ्रगकल्पितः
स्यान्नारदोऽस्य मुनिः स्मृतः गायत्रीछन्द इत्युक्तं देवश्चा

त्रप्रदो हरिः ध्यानार्च्चनादिकं सर्व्वमस्य पूर्ववदाचरेत्
यथा वै चिंतयेन्मंत्री सतत्सर्व्वं समृद्धिमान् आरुह्य स्वर्ण
पात्रे च क्षालिते शुद्धवारिणा विलिप्य गन्धपंकेन लि
खेदष्टदलाम्बुजे कर्णिकायां लिखेद्धूंः वृटितं मण्डल
द्वयं ह्रिवह्नि वृटितं षट्कोणमित्यधः तन्मध्ये विलिखे
त्कामं साध्याख्यं कर्म्मसंयुतं तत्र रेखे र्म्मनोर्व्वर्णैर्लत
कामं वेष्टयेत् सुधीः त्रिंयषट्कोणकोणानामन्तर्व्वै न
ऋतवायुषु आलिखेच्च लिखेन्मायां वह्निर्व्वरुणमूलि
षु ग्रतोरेः कामगायत्र्या वेष्टयेत् केशरेषु च मारमालाम
नोर्व्वर्णैर्द्दलेषु षट्सु मंत्रवित् लिखेद्गुह्याग्ने रेर्व्वर्णैर्म्मा
त्रकान्तहं ह्रिं ल्लिं खेत् भूविम्बे च लिखेद्धाद्यैः श्रीमाये दिशि
दिक्षु पि मंत्रमेवं समालिख्य जातरूपमये तटे राजते।
ताम्रपात्रे वा भूर्ज्जे तौ ममर्य्यः पिवा सूत्मतेनमेयवापि
प्रतिष्ठाप्य समीरणं आकर्षणं स्वरस्त्रीणां नागलोकवि
लासिनी पिशाचयक्षरक्षांसि क्रूरग्रहाश्च ये स्थिताः उच्छ्
सत्याश्रये सर्व्वे परिसर्प्पति भूतले यत्र राजगृहे दृष्ट्वा वि
द्रवन्ति दसतिव वहुना किमिहोक्तेन सर्व्वलोकेश्वखा
वहं स्त्रीणामाकर्षणं राज्ञां लोकवश्यकरं भुवि योग
सिद्धिकरं पुंसां भवसागरतारकं भुक्तिमुक्तिकरं यंत्र
मिति प्रोक्तं स्वयम्भुवा वाते घातं समारूढं मायाविन्दु
विभूषितं श्रियो वीजमिति प्रोक्तं त्वणाम् द्याः सुखप्रद
श्रीदो ह्रीकारमुद्धार्य्य कामदेव पदं वदेत् आयांतविघ्न

हेतुष्पंबाणायेतिपदेतथा धीमहीतिपदंप्रोक्तातन्नो॰
नंगप्रचोदयात् एषामन्मथगायत्रीप्रोक्तामन्मथदी
पनी कामेनाडीचसंभाव्य ततःकामपदंवदेत् देवाये
तिपदंब्रूयात्तथासर्वजनेपदं प्रियायेतिपदंतेववदेत्
सर्वजनेमुनः ब्रूयात्सम्मोहनायेतिज्वलशब्दंचवीप्स
येत् प्रज्वलेतिपदंसर्वजनस्यहृदयंतथा उत्काममव
शंपयस्मात्कुरुशब्दंचवीप्सयेत् वह्निजायातथैवस्यात्कामा
लाख्योमन्मथोमन्त्रः भूतहृच्चतुरंस्यादष्टवज्रविभूषि
ते अस्मिन्मन्त्रेसमाविश्यवासुदेवंजगद्गुरुं किंनसि
ध्यतिमंत्रज्ञोयत्कथंकथितंचते एवंतेकथितंयंत्र
प्रयोगान्तमिहोच्यते लक्षंजप्त्वापलाशानांकुसुमैस्तत्
समंहुनेत् व्याख्यातासर्वशास्त्राणांप्रविवादेवजायते
सयोगीसर्वविज्ञानीविसृयोगीतथात्मवित् शुक्लवस्त्र
स्यलाभायशुक्लादिपुष्पमाहुनेत् अष्टोत्तरशतेकृत्वा
राजतोवान्यतोलभेत् मुवंतोपितशोकस्समधुरानिंदि
तार्दितो ध्यात्वायुतंजपांतेचतावत्संख्यंचहोमयेत्
निगडान्मुच्यतेसद्योयमुद्दिश्यकृत्वाक्रियापुरन्दरमुखै
र्देवैःस्थितंहृत्स्वावनेहरिं सुरभ्याःपयसानीयैरभिषि
च्यसंस्थिते राजराजेश्वरंकृत्वामंगलाचारपूर्वकं उर्व
शीप्रमुखाभिस्तुसर्वैश्यपाभिरथिष्ठितं एवंध्यात्वाजपे
ल्लक्षंपंकजैरघृतैर्हुनेत् सार्वभौमोभवेत्सोऽपिये
नैयविहिताक्रिया आत्मानंकंसमथ्यंतरिपुंकंसात्मकं

स्मरन् निशीथे प्रजपेन्मंत्री दक्षिणामुखसंस्थितः लक्ष
मेकंजपेत्तेनवाणीरतनरतपीतोः अयुतंहोममात्रेणम्रि
यतेः रिपुश्चान्यथा अरिष्टपत्रतैनतत् पादपांशुनरैतिले
हरणाम्म्रियतेशत्रुः शंकरेणापिरक्षितः अरिष्टदलका
पाससोमाहिष्यकणसंयुते हरणाल्लक्षमात्रेणयदिभूस्थि
तोभवेत् अपिपीयुषसेवीचम्रियतेः रिपुर्वान्यथा हरि॰
द्राग्रंथिहोमेनस्तम्भयेदरिद्राग्रंथिहोमेनस्तम्भयेदरि
वाहिनीं नशांतमरणंकर्म्मकदाचिद्भुस्वेमनो क्रूरक्र
राशयेकष्टमाप्येवसतामपि इदंविधंजनंप्राप्य अ
भिचारायघोजयेत् प्रायश्चित्तायगायत्रीलक्षंजप्त्वाचसा
धकः तद्दतेपायसैर्म्मंत्री अयुतंहोममाचरेत् अपिप्रयो
गकर्तृणांशांतिःस्यात्तैवचान्यथा इतिश्रीगौतमीयेऽष्टा
दशोऽध्यायः कर्म्मान्तरमथोवक्ष्येशृणुष्वावहितोः
नघ येकृत्वामन्दभाग्योऽपिलभेन्मंत्रफलानिवै अण
वदयमध्यस्थोजपेद्युतंसंख्यया त्रिरात्रजपमात्रेण
बृहस्पतिसमोभवेत् व्याख्यातासर्वशास्त्राणांवेदाना
मपिजायते शनिवारेऽश्वत्थपल्लवमालभ्याष्टोत्तरशतं
भूयोभूयोभवेच्छांतिर्ज्जीवेद्वर्षान्तरंशतं तस्यशांतिर्भ
वेन्नूनंयमुद्दिश्यकृताक्रिया आशुकेरद्वयेनकृतसमा
समात्रतनिर्म्मलैः मुच्यतेमलिनैःकृच्छ्रैः पापैर्वीरत
रैरपि पटवस्त्रयजेद्दत्वासपत्नीमण्डलोभवेत् वि
क्रमैःपूजयनकृत्स्नंत्रैलोक्यंवशमानयेत ॥

माणिक्यैः पूजयन् भक्त्या सार्वभौमसमो भवेत् पद्मरा
गैर्यजेत् कृष्णं राजा भवति निश्चयं लद्वियः सार्वभौमः
स्यात् साधयेत् सकलां महीं गारुत्मतमयैरत्नैः पूज
यन् ज्ञानवान् भवेत् अपि हीरकरत्नेन पूजयन् किं न सा
धयेत् स्ववर्णपुष्पैरभ्यर्च्य मासमभक्तिपरायणः कुबेरस
मसम्पत्तिं संप्राप्य मोदते चिरं देहान्ते हरिं तां प्राप्य निर्वा
णपदमश्नुते रविवारेऽर्कपुष्पैश्च कह्लारैः सोमवारके
मंगले रक्तपुष्पैश्च बुधे नागरसम्भवैः चम्पके गुरुवारे
तु शुक्रे शुक्लसम्भवैः शनिवारे शमीपुष्पैः पूजयेद्भ
क्तितो यतिः रविवारे हुतान्नं तत्पयोऽभ्यर्के निवेदयेत् सो
मवारे पिष्टकादि सितया सह योजयेत् मंगले गुडसंमि
श्रं चैव फलगुणान्वितं बुधवारे यावकं तत्र सर्वे पूपसम्भ
वैः दुग्धान्नं शुक्रवारे तु शनौ सहृतपायसं वैशाखे मासि
विधिवत् तर्पयेद्धिमवज्जलैः ज्येष्ठमासि प्रयत्नेन फलैः
संपूजयेद्धरिं आषाढे मासि विधिवत् पवित्रैः पूजयेद्वि
भुं पकेकं स्वर्णसूत्राणि ग्रंथियुक्तानि कारयेत् अथवा
पट्टसूत्राणि पद्मसूत्राणि वा पुनः पूजान्ते देवदेवाय महि
षीभ्यो निवेदयेत् मिथुनेऽभ्यर्च्य घांदत्त्वा महान्तमुत्तमं वै
चरेत् नो भवेद्दुर्लभो ज्जेल्पब्राह्मणान् संशितव्रतान् प
वैसम्भवन् सरे मंत्रीकृत्वा भीष्ममवाप्नुयात् नैवेद्यं कृत्वा
पूजावाप्तोऽभैर्विंशहर्षं कृत्वा पूजावाप्तो, यकल्पते श्राव
णे मासि कृष्णं तं पूजयेत् केतकोद्भवैः चन्दचन्दनकल्

गो॰ ते॰ ५५ 55

रीकुंकुमादिसुवासितैः एलालवंगकक्कोलफलानि
बहुधार्पयेत् भाद्रमासियजेत्कुसुंभसंभवैर्बहुगुणान्वि
तैः इषमासियजेद्भक्त्याभक्तैर्भोज्यैःसविस्तरैः कार्पास
निर्मितैर्वस्त्रैर्नानाभरणसंयुतैः तुलास्थेभास्करेकृ
ष्णंपूजयेन्मासमात्रकम् रात्रौप्रदीपंहेम ++++
हेतदीपमविच्छिन्नंदद्यान्मासमहोज्ज्वलं एकादश्यां
पौष्णेवद्वादश्यांपारणादिने शुक्लायांविस्मयमभ्यर्च्योद्व
द्वालंकरणादिभिः अस्मान्निर्ध्याचमतिमान् वर्षेतान
सवमाचरेत् भोज्यानिबहुभक्ष्याणिब्राह्मणेभ्योनिवे
दयेत् एवंकृतेदेवतास्यतुष्टाचेष्टंप्रयच्छति सत्तलो
कमवाप्नोतिउनराहृतिवर्जिते मार्गशीर्षेयजेद्देवं
नवान्नैर्व्यंजनैःशुभैः नारिकेलफलतोयंमिश्रितैर्गुड
जीरकैः सहएकैर्चदेवायभक्ष्यानन्नानिनिवेदयेत् पौष
मासिचमाघेवेष्टुतधूपैः प्रपूजयेत् माघमासियजेत्
कुसुमतत्तैः सुशुभैः सितैः दुग्धार्घ्यशर्करायुक्तंमिष्टा
न्नंचनिवेदयेत् अस्मिन्मासिशुभदिनेवस्त्रेणाच्छादयेद्धि
भु फाल्गुणेदेवकीपुत्रंपूजयेत्स्वर्णपुष्पकैः चूतसौ
गन्धिकुसुमैर्धूपदीपैःसविस्तरैः चैत्रमासिवासदेव
सर्वपुष्पैःसमर्चयेत् पौर्णमास्यांयजेद्भक्त्यामदने
ष्मसगुच्छकैः अस्मिन्दिनेरतिकामंपूजयेद्भक्ति
तत्परः नचेत्साम्यन्तरीपूजाहर्षाभवतिनि॰
श्चितम् ॥

भस्मीभूतं स्मरं दृष्ट्वा रुदिता स्मररतिः सती तां दृष्ट्वा कृप
याविष्टो वरं दातुं स्वयं शिवः भर्त्तृवा वरति स्त्रियै स
भगात्त्वमवाप्नुयात् सुन्दरः सर्वलोकेषु क्रीडार्थं व्रज
सुन्दरि ततोऽभवत्कन्दर्पवलात् पुष्पमदनकं शुभ
तेन पूजनमात्रेण सम्वत्सरफलं लभेत् होमयेल्लक्ष
मात्रं यः पिष्टकैर्घृतभक्तितैः तावत्संख्यं मन्त्रजप्त्वा
कृत्स्नं पश्यति मन्त्रवित् इति ते कथितं सम्यक्पूजनं वा
पिकोद्भवैः कृत्वानेन विधानेन किं न साध्यति भूतले
पुण्यस्त्रियो गृहस्थाश्च मुनयो ब्रह्मचारिणः वनस्था
श्च तथा कृत्वा वाञ्छितं प्राप्नुयुः क्षणात् स्त्रियः शूद्राश्च
विधिवत्कृत्वा फलमवाप्नुयुः इह भुक्त्वा वरान्भोगा
न्न भूयो भवसम्भवः एवं कुर्वन्यजन्भक्त्या यत्कृ
तं जन्मकोटिभिः तत्पापैर्नविलिप्येत पद्मपत्रमिवा
म्भसा इति श्रीगौतमीये ऊनविंशोऽध्यायः ॥ गौतम
उवाच विस्तरेण मम ब्रह्मन् कुलमंत्रान्ब्रवीहि मां
भक्तोऽहं तव शिष्योऽहं योग्योऽस्मि श्रवणे गुरो नारद
उवाच शृणु ब्रह्मन् कुलमंत्रान् सर्वदेवैकसम्मतान्
यदेकज्ञानमात्रेण पुनर्जन्म न विद्यते प्रणवं पूर्वमुद्धृ
त्य नमस्तदनु चोद्धरेत् कौस्तुभायेति संप्रोच्य मनुराह्वा
तरः परः एतद्धि ज्ञानमात्रेण साक्षाद्धि स भवेद्यतिः
षड्दीर्घस्वरसंभेदात् कामेनाङ्गक्रियामता कलायकृ
समसं नामं शंखचक्रगदाम्बुजं अनेकरत्नसंछन्नं को

स्तुभोड्डासिवत्सं नागहारावलीरम्यं गरुडोपरिसंस्थि
तं ध्यात्वैवं परमानन्दं दशलक्षं जपेन्मनुं होमयेत्तद्द
शांशेन साधितैर्बिल्वपायसैः उच्चारणमंगायच्छेद्व
मन्यत्र समापयेत् यद्यन्नं भजते मंत्री भोगमोक्षैकका
रणं करं प्रवेयाः सर्वाण्यत्र तेततः परमेत्रजेत् दशाल
रसमानेहि पूजनं नमसुदीरितं अथान्यत्संप्रवक्ष्यामि
षड्वर्णं मंत्रराजकं यस्यविज्ञानमात्रेण जीवन्मुक्तो
महीं चरेत् त्रिमात्रेन मसायुक्तं चतुर्थ्याक्रमस्याद्यमपि
षडक्षरमनुः प्रोक्तो दृष्टादृष्टफलप्रदः नारदोऽस्यमु
निः प्रोक्तो गायत्री छन्द उच्यते कृष्णोऽपि देवता प्रोक्ता
दुर्गाधिष्ठात्र देवता त्रिमात्रं बीजमित्युक्तं नमः श
क्तिरुदीरिता कृष्णाय कीलकं चास्य मंत्रराजस्य कीर्तितं
विनियोगोऽस्य मंत्रस्य पुरुषार्थचतुष्टये पंचांगानिम
नोरस्य आवृत्त्यायैरुदीरिते नीलजीमूतसंकाशं किंकि
णीजालमालिनं सर्वाभरणसंदीप्तं रक्तपद्मोपरिस्थितं
सनकाद्यैर्मुनिवरैः स्तुतं ध्यायेद्दिगम्बरं आलोलकुण्ड
लोल्लसिमुखचन्द्रविराजितं शशरकाधरं रक्तपाणिपा
दविराजितं कराभ्यां पायसं स्मरणमयो हियं गतीयकं
दधतेवितयद्देवभोगमोक्षफलप्रदं ध्यात्वैवं परमात्मानं
दशलक्षं जपेन्मंत्रं जपान्ते पायसैः शुद्धैः समं कुर्यात्तम
शर्करैः तर्पयेत् दशांशेन जलैः कर्पूरवासितैः अभि
षेकं दशांशेन दशांशे विप्रभोजनं तदंते दक्षिणां दत्वासं
यथेष्टितमात्मनः सिद्धाहारो जपेन्मंत्रं वर्षमेकं व्रतास्थितः

कविर्वाग्मी समद्धश्च सर्वज्ञो जायते ध्रुवं जवनीताश
नेदेवं ध्यात्वा लतजपात् सुधीः दिव्यज्ञानमवाप्नोति
त्रिलोकीं प्राप्य मोदते यएवं मंत्रराजेन भजेत भक्ति
तत्परः इह भुक्त्वा वरान् भोगान्देहांते परमं विशे
त् अथापरं प्रवक्ष्यामि षोडशार्णं महामनुं यस्य विज्ञा
नमात्रेण कस्मात्म परमं विशेत् प्रणवंमनुनसापुंकेह
स्त्रागोविन्दकौतथा श्रीपूर्वंदेनमश्चाध्यहुंफट्स्वाहे
तिकीर्त्तितः नारदोऽस्य मुनिः प्रोक्तश्छन्दोऽनुष्टुबुदा
हृतं परमात्मा हरिर्देवो भुक्तिमुक्तिफलप्रदः दशा
र्णैकचदेवास्य जपो होमो प्रकीर्त्तितो प्रयोगस्तत्समः
प्रोक्तो वीजशक्ती वततत्समे यएनं विजयेमंत्रं सोऽपी
तेश्रुतिचतत्प्रये अनेनसदृशो मंत्रो जगत्स्वपिनविद्य
ते अनेनाराधितः कृष्णः प्रसीदत्येव तत्क्षणात् अथ
संतानसंसिद्ध्यै वालदं मंत्रनायकं यस्य विज्ञानमात्रे
ण मंत्राः सिध्यंति मंत्रिणः देवकीसुत शब्दांते गोविंद
पदमीरयेत् वासुदेवपदांते तत्ततो ब्रूयाज्जगत्पते
देहि मे तनयं देव त्वामहं पदमीरयेत् शरणंगतरु
स्त्वकामनुश्चानुष्टुभाख्यः नारदोऽस्य ऋषिश्छन्दो गा
यत्रीकथितं बुधैः सन्तानदो हरिः साक्षाद्देवता च
प्रकीर्त्यते वाक्ष्लैः समसैरंगानि कृत्वादेवं विचिंतये
त् नीलोत्पलदलश्यामं पीताम्बरमुगाहतं चत
र्भुजं शंखचक्रमूर्धपाणिद्वये स्थितं अधःपाणिद्वये वे

एंवादयंतं मुदान्विते अनेकरत्नसंनद्धकिरीटोज्ज्व
लविग्रहं नानालंकारसुभगगात्रं हरिं संस्थितं वे
दलोग्रे पीठे विविधमुनिभिः परिवेष्टितं एवं ध्यात्वार्चयेत्
क्रमशो विद्वान्ः परमाहुतिः इन्द्रादिभिर्द्वितीया स्यात्
तृतीया तत्तदायुधैः एवमभ्यर्च्य देवेशं लक्षमात्रं जपे
न्मंत्रं पुत्रजीवेन्धनचितेनतत्फलैर्घृतेर्हुनेत् अनंतरं
दशांशेन तर्पणादीनि चाचरेत् एवं प्रभजेन्मंत्री सता
नाख्यं महामंत्रं पुत्रपौत्रैर्विनश्यन्तं देहान्ते परमं व्रजेत्
अविच्छिन्नं भवेद्वंशो यावदाहूतसंप्लवं दशम्यां शुक्लप
क्षे तु निशीथे स्वस्तिमण्डले हरिमावाह्य विधिवत्पूज
येदुपचारकैः एवमर्चनमात्रेण वत्सरात्पुत्रवान्भवे
त् दीर्घायुरप्रतिहत·बलवीर्यसमन्विते वत्सरा
ल्लभते पुत्रं समं समं मयोदितं यस्यार्थे कुरुते मंत्री प्र
योगं स सुपुत्रवान् वन्ध्यापि लभते पुत्रान् शतं हा
यनजीवितान् ग्रामवाचयमाना रीवापिद्रुमदले जले
मंत्रयित्वाष्टोत्तरशतं पिबेत्पुत्रीयति ध्रुवं एवं प्रयोग
मात्रेण तनयं लभते ध्रुवं अनेन मंत्रितेनाज्येन पुत्रसिद्धिक
रं परं अनेन जलपानेन वन्ध्या वर्षाल्लभेत् प्रजां इति सो
नमीयविंशोऽध्यायः गौतम· उवाच सर्वं जानामि हे वि
ष्णुन्स्वयम्भूसंजगत्प्रभो त्वं दीरितमाकर्ण्य कृतार्थोऽहं
नचान्यथा तत्फलं सर्वं पुत्रागोपालमंत्रं प्रार्थितो हरिमीश्वरः ते
नेवाख्यनवेदेन कथितं परमं त्वयोदितं तदा रम्य पुत्रगोपालमंत्र
नवदर्शनलालसः गंगाप्रवाहं प्रणमंत्रश्रोतुमिच्छामितत्ततः

नारद उवाच बहवः कथिता मंत्रा मया ते मुनिसत्तम तमं
त्रं कथयामास येन ज्ञानेन प्रसीदति यस्य विज्ञानमात्रेण भ
क्तिः स्यात्प्रेमलक्षणा चतुर्विधं च पाण्डित्यं ज्ञानमात्रेण सि
ध्यति मत्स्भोघादरिशोऽपि शठो मूढोऽतिपातकी उपास्य
मंत्रराजं तं वागीशसमतां व्रजेत् मयापि वै पुरा पृष्टः पद्म
योनिर्यथावदत् तथा ते कथयिष्यामि गुह्याद्गुह्यतरं मु
ने द्वाविंशत्यक्षरो मंत्रो वागीशत्वप्रवर्तकः सर्वतंत्रेषु
गुप्तोऽयं गोपनीयस्त्वया मुने वेदः प्रादुरभूदस्य मंत्रेण
नेन वेधसः कवीन्द्रत्वं भार्गवस्य वागीशत्वं बृहस्पतेः
श्रियमिंद्रादयो देवा ज्ञानेन सनकादयः सौभाग्यं चन्द्र
माः प्रापत् कुबेरोऽपि धनेशतां इमं मंत्रवरं ज्ञात्वा सर्व
ज्ञो भवति ध्रुवं अष्टाष्टश्रुतशास्त्रस्य व्याख्याता शिल्पगो
भवेत् महाकविर्महाप्राज्ञो वाक्पतेः समतां व्रजेत् ज्ञा
नेन परं लब्ध्वा विष्णोः सायुज्यतां व्रजेत् यं यं काममभिध्या
यन्मनुष्यो भजते मंत्रं तं तं काममवाप्नोति ध्रुवं विश्वयो
रसातले श्रेष्ठोद्धारमहं वक्ष्ये मम सार्वज्ञकारणं कृष्णा
गोविन्दकौ ङेऽन्तौ तथा गोपीजनांततः वल्लभोऽग्निप्रि
या सर्गी ह्यसर्वः समनुस्वरः नाम्नामादौ क्रमात्कामं मायां
लक्ष्मीं नियोजयेत् द्वाविंशत्यक्षरो मंत्रो वाग्भवाद्यः प्रकी
र्तितः ब्रह्मा स्यान्मुनिश्छन्दो गायत्री देवता मनोः गंगाप्रवा
हणः कृष्णः सर्वदेवनमस्कृतः गंगाप्रवाहवद्वाणी जा
यते तेन तन्मया गंगाप्रवाहणो नाम कीर्तितः परमात्मनः

गो॰
ता॰
५८
58

बीजं त्वमात्मच्छंदो श्रीकंशक्तिः पत्नीह हविर्भुजः कृष्णायकाम
बीजाद्यं हृदयं परिकीर्तितं गोविन्दायशिरस्तद्वन्मायाद्योऽ
सौमहामनुः गोपीजनशिखोक्तं तु श्रीबीजाद्येन विग्रमेत
वल्लभायेतिकवचं अस्त्रं जायाहविर्भुजः शेषबीजेन संहिताः
पंचांगमनवः स्मृताः मूर्ध्नि भाले भ्रुवोर्मध्ये नेत्रे कर्णे तथा
नसि आस्ये कंठे च दोर्मूले हृदये चोदरे नाभिषु लिंगमूले त
थाधारे जान्वोश्च गुल्फयोः समस्तेन च मंत्रेण व्याप
कं मस्तं विन्यसेत् कलायकुसुमश्यामं पूर्णचन्द्रनिभाननं
बर्हिबर्हकृतोत्तंसं वनमालिनमीश्वरं किरीटहारकेयू
ररत्नकुण्डलमंडितं श्रीवत्सवक्षःसंभ्राजत्कौस्तुभा
ड्यासितोरसं भुवनैकशलावण्यरमणीयतनुं हरिं दि
व्यपीताम्बरधरं चारुहारविभूषितं स्मेरारुणाधरन्य
स्तवेणुं त्रैलोक्यमोहनम् उड्डेवदमयं वेणुं वादयंतं च
तुर्भुजं स्फाटिकीमक्षमालां च विद्यामुद्रां करद्वये दध
तं पुण्डरीकाक्षं दिव्यगानपरायणं आतत्वानल्पसौन्दर्यं
मोहयंतं जगत्त्रयं तपनीयलसत्कांत्या वीणाकमल
हस्तया निरीक्ष्यमाणचरणं वामपार्श्वस्थया श्रिया
हेमसिंहासने रम्ये सर्वरत्नोपशोभिते रुक्मिण्यादिम
हिषीभिर्निषेवितमनारतं चन्द्रमण्डलसंकाशश्वेतछ
त्रोपशोभितं नारदाद्यैर्मुनिगणैर्ज्ञानार्थिभिरुपा
सितं इन्द्रादिदेवनाथैन्द्रैः प्रणतं परमेश्वरम् ॥

सर्वज्ञं जगदीशानं ध्यात्वा हृदयपंकजे जपेद्देवं मनुव
रं ध्यात्वा लक्षचतुष्टयं स्वाहान्तैः कुसुमैर्बिल्वदलैर्जुहो
समाचरेत् दशांशेन च मंत्रोऽयं सिद्धो भवति नान्यथा
पूजा दशांशतो रे पीठे अंगावृतिरनन्तरं मरीचीभिर्दिविता
या पित्रतीयाद्दिगधीश्वरैः चतुर्थी तत् प्रहरणैश्चतुरा
वृत्तिरीरिता प्रातःप्रातः पिबेत्तोयं मंत्रेणानेन मंत्रितं
वागीश्वरसमो भूत्वा काव्यकर्ता महान् भवेत् अनेन मंत्रि
तेनित्यं वल्गापात्रं प्रवर्तयेत् मण्डलादेवभक्तिमान् म
हाश्रुतिधरो भवेत् वाल्मीकि सुवचा कल्के हतेन हि गु
णेन च चतुर्गुणं भवेद्गद्यपावितं हुतमुत्तमं अवताध्य
जपेदत्र अयुतं जपमादरात् वर्षमेकं प्रातरेव भक्तयेन्मौ
नमास्थितः एतद्व्रतमात्रेण बृहस्पतिसमो भवेत्
हस्तमाशाष्यजिह्वायां जपेदयुतमादरात् प्रतिभा जायते
दिव्या सर्वलोकैकभाविता धवलैरुपचारैल्लयद्दिदेवं
प्रपूजयेत् दिव्यज्ञानमवाप्नोति प्रतिभा विश्वजित्वरी श्री
विद्यायां यदा जप्ता तदा लक्ष्मीरवंचला कामाद्यं जपनादे
व सर्वलोकवशं नयेत् मायादि जपनादेव वाकसिद्धिर्जो
यते चिरात् शक्तिबीजादिको मंत्रो निर्वाणमविराद्दिशेत्
घटनात् प्रणवाद्यात् मोक्षमाप्नोति निश्चितं एवं मनुवरं
जप्त्वा किं न सिध्यति मंत्रवित् एवमेव वरं यस्तु भजते भक्ति
तत्परः इह भुक्त्वा वरान् भोगान् समस्तक्रीडिसंयुतान्
समाप्ति परमां लक्ष्मीं भूयाद्देते परे पदे कामेन्द्राद्यापरा

गो॰ ते॰ ५५
59

शक्तिनदिविन्दुसमन्विता कथितःकामसमंत्रोयंमंत्रा
णामधुनायकं ऋषिर्ब्रह्मासमाख्यातोविराट्छन्दउदी
रितंत्रैलोक्यमोहनोदेवश्रीकामः परिकीर्तितः कल
षड्दीर्घवीजेनषडंगः परिकीर्तितः अशालम्बितवा
मकुणलयरमन्दोल्लसत्भूतले किंचित्कुंचितको
मलाधरपुटस्मितविभ्रमावेनतेण आलोलाङ्गुलिपल्लवै
र्मुरलिकामापूरयंतंमुदा मूलेकल्पतरोस्त्रिभंगललि
तंध्यायेज्जगन्मोहनं एवंध्यात्वाजपेमंत्रमयुतादशल
लकं तद्दशांशेनजुहुयात्पायसेरथवाम्बुजेः दशा
तरोदिनेपीठेपूजयेत्तद्विधानतः प्रयोगानपिसर्वेवत
डकेनापिकारयेत् अथवावालकंलेवनीलेन्दीवरसन्नि
भंरत्नाभरणसंदीप्तं द्विभुजंनीलकुन्तलं पायसंनव
नीतंचकराभ्यांदधतंस्मरेत् लक्षमेकंजपेन्मंत्रंपायसै
र्होमयेत्शुभैः दशांशंविधिवद्भक्त्यापूजांगोत्वादिकाम्
तैः होमयेद्युतंमंत्रीघृतभर्जितपिष्टकैः अलक्ष्मीन
शपतिलिप्रकाशितेजश्चविन्दति पलाशकुसुमैर्हुत्वा
वाकसिद्धिलभतेध्रुवं पंकेजैर्जुहुयान्मंत्रीअयुतंश्रि
यमाप्नुयात् नवनीतस्यहोमेनकविर्वाग्मीप्रजायते
वासुदेवपदेवोत्काउनिगडाच्छादनायच वासुदेवहु
यवोत्कास्वाहेतितन्मनुर्मतः नारदोऽस्यमुनिःप्राक्त
च्छन्दोऽसुवुदाहृतं निगडच्छेदनोलक्ष्मीवासुदेवोऽस्यदे
वता पंचाङ्गानिमनोरस्यआचक्राद्येस्तुकल्पयेत् राजम

ण्डलमध्ये तु के संनिपात्य हेलया ज्ञातीनां वर्द्धयन् हर्षं
श्रानीय पितरौ स्वयं निगडान्मोचितो भक्त्या प्रणम्य च
पुनः पुनः वासे संस्थाप्य विधिवद्देवकीं वीक्षितैर्नन्दपैः
एवं ध्यात्वा जपेल्लक्षं तज्जं हुत्वा तद्दशांशतः श्रीमत्प्रसादि
केसर्वे नन्दत्रवचनोदितं यएवं चिंतयेन्मंत्री स सम्यक
सम्पदां निधिः राजदुर्गभयादिभ्यो मुच्यते स्मरणात्
तणात् निगडी मूलहोमेन मुच्यते बन्धनादिभिः
राजद्वारे भये घोरे स्मरणान्मुच्यते भयात् इति श्रीगो
तमीये एकविंशोऽध्यायः गोपालं पिण्डसंज्ञं च
कथयामि मुने शृणु यदाकर्ण्य गुरोर्भक्त्या परत्रेह च
मोदते अनेन सदृशो मंत्रो जगत्स्वपि न विद्यते पंचा
न्तको धरासंस्थः सबिन्दुकमनुस्वरः कथितो मंत्रराजो
ऽयं भुक्तिमुक्तिफलप्रदः ऋषिर्ब्रह्मास्य गायत्री छन्दः
श्रीकृष्णदेवता गलाभ्यां बीजशक्तीतु कीलकं लेख मु
च्यते षड्दीर्घभाजा बीजेन षडंगानि प्रकल्पयेत् हृत्प
वनगते कृष्णे रत्नसिंहासनस्थिते कदम्बमूलदेशे
तु गोपिकाजनवेष्टिते नारदाद्यैर्मुनिवरैर्दिव्यगाना
वसन्नकैः सहिते परया भक्त्या वनमालिनमीश्वरं
रत्नालंकारसन्दीप्तं शंखचक्रलसत्करं शार्ङ्गत्रलम
यवेणमयः पाणिद्वयोरिति एवं ध्यात्वा मनुवरं लक्ष
मात्रं जपेद्वशी सिताज्वितैः पायसैर्लक्षपुतैर्होमं समाच
रेत् यएवं भजते मंत्री सिद्धय लभते महत्स्वगाः यवलेः

गो॰ तं॰ ९॰ कुसुमैर्होमात्कक्षिडिंलभते ऽचिरात् कर्णिकारसुहोमे
न लक्ष्मीः सर्वविद्याभवेत् अनेनमंत्रितं तोयं प्रातः प्रातः
पिबेज्जले कविर्वाग्मीश्रुतिधरः सर्वज्ञो जायते ऽचिरात्
60 अस्योपासनमात्रेण किं न सिध्यति मंत्रिणः इहभुक्त्वा वरान्
भोगान् पुत्रपौत्रैः समन्वितः अंतेनतत्परं धाममंत्री या
ति निरामयं अथ वक्ष्ये महामंत्रे सर्वाभीष्टफलप्रदे यस्य
धारणमात्रेण किं न सिध्यति भूतले बीजं त्रिकोणमा
लिख्य षट्कोणं तद्बहिर्लिखेत् षड्दलं लिखेत् तद्बहि
रष्टदलं लिखेत् अष्टाक्षरेण संयुक्तं तद्बहिः षोडश
च्छदं षोडशार्णैःक्रमान्मन्त्रं बहिर्दशदलान्वितं दशाक्ष
रेण संयुक्तं अष्टादशदलं ततः अष्टादशार्णेनमन्त्रेण ब
हिर्द्वात्रिंशदम्बुजं देवकीसुत इत्यादि तत्रैव हलमालि
खेत् पिण्डबीजं वेष्टतमालिखेत् पिण्डबीजं वेष्टकेन
यंत्रस्य च सर्वतः तद्बहिर्हलैर्निष्पाद्यमातृकां तत्र वेष्ट
येत् हल्लद्वयं ततः कृत्वा शापांकुशेन वेष्टयेत् तद्बहि
र्हेनमेकेनचतुरस्रं सवज्रकं एतद्यंत्रं महायंत्रं रूप
पात्स्नितमम सवर्णापत्रे भूर्जे वा नित्यं यः समाहि
तः अष्टगन्धेर्मसीकृत्वा लिखेत्स्वर्णशलाकया अस्य
धारणमात्रेण सत्ताड्डमिपुरन्दरः मुच्यते मलिनैः कृ
च्छ्रैः विचीरतैरपि शांतिं च शाश्वतीं लब्ध्वा याति
तत्परमं पदं स्त्रीणां वामभुजे नित्यं धारणात्किं
न सिध्यति ॥

वन्ध्यापि लभते पुत्रं शतहायनजीवकं दीर्घायुरप्रति
हतबलवीर्यसमन्वितं राशिचक्रे विलिख्याथ कुम्भे
संस्थाप्य पूर्ववत् विनिक्षिप्य यन्त्रं तन्मध्ये सकातसर्वं हि
साधयेत् निमदर्शी भवेद्विप्रो मन्त्री शाल्मिमहीपतिः
वैश्यः समृद्धिमान् भूयात् लभेत् शूद्रो यथेप्सितं एत
त्कथितं यन्त्रं पुरुषार्थैकसाधनं केवलेन तत्प्रयत्नेन
गोपयस्व मुने स्वयं इति श्रीगौतमीयतन्त्रे विंशोऽध्यायः
अथ वक्ष्ये मनुवरं समस्तपुरुषार्थदं यज्ज्ञानात्
सिद्धयः सर्वा भवन्ति करसंस्थिताः लक्ष्मीमायाकामबी
जैर्ङेऽन्तं कृष्णपदं तथा स्वाहेति मन्त्रराजोऽयं भुक्तिमु
क्तिफलप्रदः नारदोऽस्य मुनिः प्रोक्तश्छन्दोऽनुष्टुबुदाहृ
तं देवता कृष्ण इत्युक्तः समस्तपुरुषार्थदः षडङ्गं का
मबीजेन षड्दीर्घभेदेन तु कलायकुसुमश्यामं वृ
न्दावनगतं हरिं गोपगोपीगवावीतं पीतवस्त्रयुगावृतं
नानालङ्कारसुभगं कौस्तुभोद्भासिवक्षसं सनकाद्यैर्मु
निश्रेष्ठैः संस्तुतं परया मुदा। शंखचक्रलसद्बाहुं वेणुह
स्तं हृदयेरितं ध्यात्वैवं परमात्मानं चतुर्लक्षं जपेन्मनुं द
शांशं जुहुयान्मन्त्री कुसुमैर्बलहलजैः भक्त्या त्रिसन्ध्य
चयेजेद्देवं गन्धादिभिस्ततः तथा प्रयोगे कुर्वीत धर्मा
र्थकाममुक्तये पायसैर्घृतं हुत्वा दिव्यज्ञानमवाप्नुया
त् तद्दलवर्णैर्हुत्वा लोकानाकर्षयेद् ध्रुवं पलाशपु
ष्पैर्जुहुयात् कविर्वाग्मी च जायते मत्स्याद्रिकदलीड

गो॰
६१
61

मध्वक्तपायसं तडिया तर्पयेद् युतं मंत्री गांगेयेन ज
लेन वै मण्डलादीक्षिता क्षिद्धिर्भवेन्नेवात्र संशयः वा
गभवायेनजायेन वागीशसमतां व्रजेत् आलीतनक
सैर्मैर्हुत्वा निधिमाप्नोमयव्रतः श्रीफलफलहोमेन
राज्यैश्वर्यमवाप्नुयात् एवं ते कथितं भक्त्या दुर्लभं म
न्त्रनायकं सत्सम्प्रदायकेशामं किंन सिद्धति मंत्रिणः
अष्टादशार्णो मारोनो मंत्रः सर्वधनप्रदः नारदोस्य मु
